No. १४५१

Title जागदीश्यां सामान्य लक्षण टिप्पणी

Author म. म. जगदीश:

Extent ५० Age १८३१

Subject न्याय वैशेषिकं

जागदीशं सामान्यलक्षण
टिप्पनी

१४५८

५०पत्र

सर्वस्त्वाज्ञापयितुमितस्य सन्निकर्षत्वेनेत्यादिः तेन ज्ञातसामान्यस्य सामान्यज्ञानस्य वा सर्वसंमतत्वान्नासंगतिः समानाधि
तथा करणवृत्तिधूमत्वादेर्व्याप्तित्वधर्मान्तरेण गृहीतस्य तस्यैवायनीतस्य पर्वतीयवह्निरूपग्रहेऽपि तदीयधूमे परामर्शसंभवादाह समा
नाधिकरणयोरेवेति पक्षे मतेऽस्य चेति पर्वतीयवह्निव्याप्तिग्रहस्यैवास्यार्थः लक्षणेनस्यानुमितीत्यादिः उपोद्घातोपीति व्या
प्तिग्रहस्य प्रकृतस्य सिद्ध्यर्थं चिंतनीयत्वादिति भावः अपिनाप्रसंगस्यापि तथात्वं सूच्यते व्यापकसामानाधिकरण्य
मात्रं रासभादिसाधारणतया न व्याप्तिः साधननिष्ठस्य तादृशसामानाधिकरण्यस्य व्याप्तित्वे विशिष्टसत्वव्यापकं द्रव्यत्वसा
मानाधिकरण्यवतः सत्वमात्रस्य गुणादौ परामर्शात्तत्र द्रव्यत्वानुमित्यापत्तिः किंचास्तु समानाधिकरणयोरेव व्याप्तिः तथा
पि द्रव्यत्वादिहेतुकसत्वादिसाध्यकानुमितिं व्याप्तिविशिष्टेत्यादिलक्षणेन संगृह्यतद्वृत्तिजातिमत्वस्य वक्ष्याद्यनुमिताव
पि नेतव्यत्वान्नोपोद्घातः संभवतीत्यस्वरसः केचित्तु उक्तास्त्विति विशेषणतारूपाया अतिरिक्तरूपाया द्विविधायाः प्र ४५
त्यासत्तेर्मूलकृताभिधानादुभयत्रैव सामान्यलक्षणाशब्दव्युत्पादयतिस्मत्रेचेति यद्यपि सामान्यं चेतल्लक्षणं चेति कर्म

धारयस्यैवसम्भवात्केवुहुव्रीहिरनुचितः तथापिकर्मधारयस्येलक्षणापदस्यानुपसर्जनत्वसामान्यलक्षणाप्रत्यासत्तिरितिप्रयो
गेनस्यात्प्रत्युतसामान्यलक्षणाप्रत्यासत्तिरित्येवस्यात् लक्षणाशब्दस्यात्तहद्धिंगत्वादतोवहुव्रीहिराहृतइतिभावः
निरूपकमितिविषयतायानिरूपकमित्यर्थः केचित्तुवनुहातमामान्यंसामान्यज्ञानंवावस्तुसामान्यलक्षणातस्याःप्र
त्यासत्तित्वंकुतः षोढाप्रत्यासत्त्यनंतर्गतत्वादत उक्तं साचेति तथाचतस्याःविशेषणतायामेवनिवेशात्त्रैविध्यातानंत ग
र्भावः षड्विधगणनस्यलौकिकप्रत्यासत्तिपरतयासामान्यलक्षणायास्तदनंतर्भावेपिनक्षतिरित्याशयेनोक्तमति
वे रिक्तैवेतिषड्विधप्रत्यासत्त्यतिरिक्तैवेत्यर्थः इतिमूलंव्याचक्षुः नन्विंद्रियसंबंधविशेषणत्वंयदींद्रियसंबद्धवृत्तित्वंतद
धूमत्वस्येंद्रियसंबद्धवाष्पादिधर्मत्वाभावात्तादृप्येणवाष्पयहात्मकालेधूमप्रत्यक्षंनस्यादतोव्याचष्टेतद्विशेष्य
केतितत्प्रकारकतद्राश्रयप्रत्यक्षंप्रतिइंद्रियसंबद्धविशेष्यकज्ञानप्रकारतापन्नतद्रूपत्वेनहेतुत्वमित्यादिविध्यकर्तुंमोहधू ।।म०
मत्वादिरितिधूमत्वादिप्रकारतापर्यवसितायाविशेषणतायाधूमत्वादिसामान्यस्वरूपत्वासंभवादाहविशेषणातेत

व५

३

संनिकृष्टधर्मिकज्ञान ... लाघवात् ... धूमत्वादिप्रकारक २

त्रितयथापि भावार्थस्याविवक्षायामपि न क्षतिः संनिकृष्टधूमधर्मिकज्ञानप्रकारतापन्नधूमत्वादेरिव धूमत्वादिनि
ष्ठायाः प्रकारताया अपि स्वाश्रयाश्रयत्वरूपपरंपरासंबंधेन धूमत्वाद्याश्रयप्रत्यक्षं प्रति हेतुत्वस्य सुवचत्वात् तथा
पि सामान्यस्य हि प्रत्यासत्तित्वेन तु सामान्यतया ज्ञानस्येति मूलग्रंथमनुरुध्यैव भावप्रत्ययस्यार्थः परित्यक्त इति ध्ये
यं ननु भावार्थस्याविवक्षायां सा चेत्यनेन साकमिंद्रियसंबद्धविशेषणतापदार्थस्याभेदान्वयो न स्यात् तन्नियामक
स्य समानविभक्तिकत्वादेस्तत्रासत्त्वात् रूपादेवेत्यादिवत् कथं विनसमर्थेन विभाक्तप्रत्ययस्यैव यथ्यापत्तिरेवेत्स
स्वीकारा तत्राह तत्र विशेषणत्वमिति व्यधिकरणबहुव्रीहिः सर्वत्राव्युत्पन्नत्वादाह संबद्धपदस्यैवेति न त्विंद्रियसंबद्धविशेष व
इ णत्वं यस्येति बहुव्रीहौ तादृशसंस्कारादिप्रकारतामादायातिप्रसंगः प्रकारतार्थकस्य विशेषणताशब्दस्य ज्ञानप्र
कारतापरतायामाधुनिकलक्षणापत्तिः तत्राह संबद्धपदस्येत्यपि वदंति अत्र चेति इंद्रियसंबद्धविशेष्यकज्ञानप्रका
चे रीभूतसामान्यस्येत्यर्थः इंद्रियजन्यत्वमिति तत्तदिंद्रियप्रयोज्यं चाक्षुषत्वादि वैजात्यमित्यर्थः चाक्षुषत्वाद्यप यथाश्रुते

तत्तदिं १

ज्ञान
स्पयाश्च क्षुर्जन्यत्वादेः कारणतावच्छेदकत्वे गौरवापत्तेरिति ध्येयं नियामकं कारणतावच्छेदकतया तथा च तत्सुरभीयधूमत्वा प्रयोजकं
२ द्विप्रकारक चाक्षुषं प्रति तत्सुरभीय चक्षुः सन्निकृष्टवि...क तत्सुरभीय चाक्षुषप्रकारतापन्न धूमत्वं चन्दिदं हेतुः तत्र कार्य
स्याऽलौकिकमुख्यविशेष्यताकारणस्य तु समवायः ...सन्निः तेन प्राथमिक धूमत्वविशिष्ट चाक्षुषधूमकालीनोऽयं घट
स्पादिधूमोपनीत चाक्षुषे वा न व्यभिचारः एवं घटत्वादिसामान्यमन्तर्भाव्यापि बोध्यं कारणतावच्छेदकविशिष्टस्य व्य
वहितपूर्वसत्त्वापेक्षणाच्च न कालान्तरीयचक्षुःसंयोगादिकमादाय अतिप्रसंगः न च लौकिकसन्निकर्षस्य नानात्वात्
संयोगघटकतरस्य निवेशे ज्ञायमानप्रत्यक्षस्थले ... त्वावच्छिन्नेति न कोपि दोषः नन्वेवमपि पुष्पादौ सौरभ
त्वभ्रमाज्ज्ञायमानस्य चाक्षुषस्य सौरभमुख्यविशेष्यकत्वं स्यात् तथा च बहिरिन्द्रियाणां स्वायोग्यमुख्यविशेष्यक
ज्ञानाजनकत्वनियमो भज्येत इति वाच्यं सामान्यभेदेन कार्यकारणभावभेदाच्चाक्षुषस्थले सौरभत्वाघटितभावेन
त्व हेतुत्वस्यैव [redacted] वा कल्पनाच्चाक्षुषस्य सौरभमुं [redacted] विशेष्यकत्वासंभवादेवं स्पार्शनादावप्युत्त्यमिति संक्षेपः बहिःप राम०
व्यभिचार इति वाच्यं चक्षुर्निष्ठ लौकिक चाक्षुष घटकसंबंधत्वेन चक्षुर्लौकिकसन्निकर्षमात्रस्य वक्तुं विवक्षितत्वादिति केचि
त्तु चक्षुःसंयुक्तविशेष्यक चाक्षुषाव्यवहितोत्तर जनकता रचाक्षुषत्वावच्छिन्नं प्रति तादृश चाक्षुषप्रकारतापन्नधू
मत्वेन हेतुत्वं तेन चक्षुर्निष्ठतादृश जनकताया अतिव्याप्ति ... नातिरिक्त ...

यितस्यफलमाह एवंचेति प्रथमं अणुसामान्योपस्थितौ ज्ञानलक्षणो न संभवतीत्यत उक्तं यत्किंचिदिति अणूपस्थिता
घटत्वेन वपीत्यपिनार्थः किंचिद्घटोपस्थित्यादेः परिग्रहो अतो न न्यूनत्वं मानसेबोध्यइति तथा चालौकिकमुख्यविशेष्यतयातत्प्रका
मितिभावः रकमानसप्रत्यक्षं प्रति ज्ञानप्रकारतापन्नतत्त्वेनैव हेतुत्वं वक्तव्यं चन्दने सौरभमित्यादिज्ञानोत्तरजायमानस्य सुरभिचंदन
मित्यादिसौरभाश्रयमानसस्य सौरभप्रकारकज्ञानाजन्यत्वात् व्यभिचारः तत्रत्मानसोपनीतभानात्मत्वेनकार्यस्यविशे
षणीयत्वादित्यर्थो वदंतीत्यस्वरसः तद्बीजंतु लाघवात्तत्प्रकारकज्ञानत्वेन तद्विषयकज्ञानत्वेनवात्तत्प्रकारकतदाश्रय
प्रत्यक्षे हेतुत्वं न तु तादृगिंद्रियजन्यत्वादिकं नियामकं इंद्रियभेदेन कार्यकारणभावकल्पने गौरवात् तत्तदिंद्रियकरणकत्व
द्धर्मवत्त्वावबोधसामग्र्याः सहकारित्वोपगमादेवातिप्रसंगभंगादित्यादिकं नव्यमते व्यक्तीभविष्यति एतेनैव परास्तमित्य ति
प न्वयः एतेन इंद्रियसंबद्धविशेष्यकज्ञानप्रकारतावच्छेदकस्यप्रत्यासत्तित्वेन एतादृशनियामकत्वेनच विशेषणपदस्य धर्मी
र्यकत्वे दोषमाह धूमत्वेनीत्यादि धूमदर्शनादित्यस्य पक्षइत्यादिः हेतुभावेन धूमधर्मिकव्याप्तिप्रकारकहेत्वभावेनज्ञाने
विवक्षणे२

3 तदिंद्रियजन्यत्वानुक्तौ दोषमाह धर्मिमिलीति धर्मिणि योग्यसन्निकर्षे सति धर्मस्य चाक्षुषोद्भूतरूपस्तूक्तदोषवशादिति वाध्यत्वा
दिभ्रमजनकदोषवशात् घ्रमत्वाद्यग्रहसंभवादितिभावः स्मरणेति एतेन ज्ञानप्रकारत्वमाविष्कृतं सामान्येनेत्यस्य चाक्षु
षज्ञानायत्तिरित्यन्वयेन तेन सम्बंधः लौकिकसंबंधस्यानपेक्षणाद्दोषमाह स्मर्यमाणेनैवेति धर्मिणानयनेन तत्स्मर्यमाणेन
वा सामान्येनेत्यर्थः नच लौकिकसन्निकर्षविगमेपि स्मरणमात्रेण चाक्षुषोत्पत्ताविष्टापत्तिरिति वाच्यं तथा सति तादृशचा
क्षुषात्मकस्यैव कारणस्य सत्वादुक्तरीत्या सामान्यजन्यायाश्चाक्षुषधारायाः प्रसंगादितिभावः ननु सामान्यस्य प्रत्या
शून्य सत्तित्वे घटत्वत्वादिरूपस्य तदाश्रयप्रत्यक्षं न स्यात् घटत्वत्वादेः सामान्यत्वाभावादतः आह सामान्यं चेति सामान्य शून्य
लक्षणेत्यत्र सामान्यपदार्थश्चेत्यर्थः सखंडं स्वरूपतः प्रकारीभूतं भिन्नं अखंडं स्वरूपतः प्रकारीभूतं द्विधेति तथा च त
त्र सामान्यपदं धर्ममात्रपरमितिभावः ननु घटत्वप्रकारेणैकघटवत्तौ प्रत्यक्षानंतरं घटस्वत्वप्रत्यासत्त्या सर्वस्य घटवतः राम०
प्रत्यक्षं न स्यात् इंद्रियसंबद्धविशेष्यकज्ञानप्रकारतापन्नघटत्वेन्द्रे घटान्तरस्यासत्वादत आह सखंडे चेति किंचिदित्या
प्रकारकं

२

स्वयमेव१ इतिवाच्यं॰३

दिःतेनघटघटत्वत्वस्यस्वरूपसंबंधस्यैवप्रत्यासत्तित्वेपिनक्षतिः परंपरेतितथाचयत्रचक्षुःसन्निकृष्टविशेष्यकचाक्षुषप्रकारतावच्छे
दकीभूतघटत्वमेवघटत्वावच्छिन्नप्रकारताक॥चाक्षुषंप्रतिहेतुःअत्रापिकार्यस्यालौकिकमुख्यविशेष्यताकारणा
स्यतुल्याश्रयत्वप्रत्यासत्तिःतत्पूर्वानुपस्थितघटांतरस्यतादृशचाक्षुषप्रकारत्वायोग घटत्वसामान्यलक्षणायास
कलघटोपस्थितिदशायामेवतत्संभवात् दंतद्दिमत्वादिसामान्यलक्षणेनापितादृशचाक्षुषप्रकारतावच्छेदकतावच्छेदकं
मिति दंडत्वादिकमेवकारणंद्रष्टव्यं एतेनपरंपरासंबंधेनज्ञानस्यघटत्वादिप्रत्यासत्तित्वेघटत्ववदित्येवफलंस्यान्नतुघटत्व
दित्याकारकंचाक्षुषप्रकारकप्रत्यक्षंप्रत्येवसामान्यस्यहेतुत्वादितिपरास्तं ननुचक्षुःसंयुक्तेधर्मिणिसमवायेनघटह
मारास्यघटत्वादेःकालिकादिसंबंधेनकालत्वादावपिसत्वान्नमुख्यविशेष्यकमपिसमवायसंबंधावच्छिन्नप्रकारक घटत्व
चाक्षुषंस्यादतस्त्वाहयेनचेतिप्रत्यासत्तिःप्रत्यक्षजनिका तथाचालौकिकमुख्यविशेष्यतायाःसमवायादिसंबंधावच्छि
न्नघटत्वप्रकारकचाक्षुषंप्रतिसमवायादिसंबंधावच्छिन्नचाक्षुषप्रकारतापन्नघटत्वादिकंसमवायेनैवहेतुरतो

५

नातिप्रसंगइतिभावः अखंडसामान्यव्यक्त्यभिप्रायेणाशंकते नन्विति सामान्यतासंपत्त्यर्थमाह नानाधिकरणेति नाना
धिकरणाविशेष्यकस्यास्य पक्षकारणामित्यर्थः एतेन एकमात्रवृत्तिधर्मस्यापि स्वाश्रयपक्षं प्रति हेतुत्वादिदं व्यर्थमत एवा
ये तद्दूषणावस्त्वंतरेपि व्याप्तिभ्रमोत्तरं तद्विशिष्टस्य पक्षधर्मताग्रहादनुमित्यनुपपत्तेरिति परास्तं एकव्यक्तिरित्यनेनाखंडत्वं
सूचितं पदार्थस्य द्वैविध्याद्द्रव्यात्मकं सामान्यमुक्त्वाऽभावात्मकं तदाह तत्राभावादिर्वेति अनित्यइति नित्यहेतुकार्य ग
कालेपि सत्त्वात्तस्य कारणत्वमव्याहतमेव स्यादिति भावः तादृशघटादिकं नाखंडसामान्यं किंतु सखंडमित्याशयेन शिद्धां
तयति तत्रापीति ननु तद्व्यक्तौ घटत्वस्याग्रहेपि तद्व्यक्तिप्रकारेण तदाश्रयप्रत्यक्षोत्पत्त्यानेदंयुक्तमिति वाच्यं ज्ञात्यति
रिक्तस्य किंचिदवच्छिन्नप्रकारतानियमेन तत्तद्घटादेः स्वरूपतः प्रकारत्वायोगात्तद्व्यक्तित्वस्यापि तद्व्यक्तिनादात्म्यवि
शिष्टसमवायादिसंबंधेन घटत्वादिमत्तायामेव पर्यवसानात् ननु तथापि घटत्वादिसामान्यस्य तदानीं सत्त्वेपि तद्व्य राम॰
क्तिस्वरूपस्य संबंधस्यासत्त्वात् तद्व्यक्तिद्वारा तस्य कारणत्वं दुर्घटमिति वाच्यं अलौकिकमुख्यविशेष्यतासंबं

धेन तद्घटव्यक्तित्वावच्छिन्नप्रकारताकचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंबद्धविशेष्यकचाक्षुषप्रकारतावच्छेदकीभूततत
द्व्यक्तित्वस्य स्वाश्रय वृत्तिनिष्ठविशेष्यतासंबंधेनैव हेतुत्वात् सर्वत्रातततोनिरस्तज्ञानीयतादृश विशेष्यतामादायैव कारणा
त्वसंभवादेतज्ज्ञाभार्थमेव तद्व्यक्तिद्वारेत्यत्र द्वारपदोपन्यासादिति भावः ननु जातीतरस्यापि स्वरूपतः प्रकारत्वोपग
मे तत्तदनित्यघटादिव्यक्तेर्घटत्वाप्रज्ञानदशायां प्रत्यासत्तित्वं दुर्घटमेवेत्यत आह एतदिति द्वितीयमिति सामान्यं लक्षणं वि
तु षयतया निरूपकं यस्या इति व्युत्पत्तिलब्धं सामान्यज्ञानात्मकं पक्षमित्यर्थः घटपदार्थातिरिक्तस्यानुपगमात् सामान्यातिरि
क्तमात्रस्य प्रत्यासत्तित्वे तु सामान्यस्याज्ञानदशायामपि तदाश्रयस्य प्रत्यक्षप्रसंगाद्धा चेष्टे इंद्रियसंबद्ध इति तादृशे
ति तदिंद्रियजन्येत्यर्थः तथा च तत्तद्रूपीयघटत्वादिप्रकारतौकचाक्षुषत्वावच्छिन्नं प्रति तत्तद्रूपीयचक्षुःसन्निकृष्टवि
शेष्यकतदीयघटत्वादिप्रकारकचाक्षुषत्वेन हेतुत्वं अत्रापि फलस्य कार्यस्य लौकिकमुख्यविशेष्यत्वमेव कारणस्य तु
स्वप्रकारीभूतसामान्याश्रयनिष्ठविशेष्यत्वं प्रत्यासत्तिः अतो न तत्तदनित्यव्यक्तिमत्त्वस्यासत्त्वदशायां तया प्रत्यासत्त्या

तदाश्रयप्रत्यक्षानुपपत्तिः ॥ यत्तु स्वप्रकारीभूतसामान्यवदन्यावृत्तिमेदवत्त्वमेवक्स्वेत्रकारणताघटकः संबंधः तत्तद्दनित्य
मपि घटादेरसत्वदशायां तत्तद्दन्यावृत्तितत्तत्कपालान्यतरत्वरूपभेदस्य सत्वात् तन्तु स्मृतिविषयत्वाद्यनित्यप्रत्यासत्तिस्थ द्विति
लेतद्दन्याप्रसिद्धेः स्मृतिविषयत्वादेः केवलान्वयित्वादिति ध्येयं तत्प्रकारकत्तदाश्रयप्रत्यक्षे तत्स्यज्ञानमात्रं हेतुः नतु तदि ज्ञानस्यत
न्द्रियजन्यत्वं तत्तदिन्द्रियसंबद्धविशेष्यकत्वं वा तत्र चक्षुरादीन्द्रियभेदेन पुरुषाणां द्विधा निवेशेन च हेतुत्वकल्पने गौरवात्
स्मरणात्मकसामान्यज्ञानदशायां च तदाश्रयप्रत्यक्षमंततो मानसात्मकमुत्पद्यत एव प्राच्येरपि क्षणविलंबेन तत्संयो
पयत्वादित्याशयवतां नव्यानां मतमनुपपादयति स्वतीतिभ्यादिनामवुपादित्वाघवानुरोधादिन्द्रियसंबद्धविशेष्यकत्वादे
परित्यागः तदा सामान्यस्यैव प्रत्यासत्तित्वं युक्तमिति स्वरूपतः सामान्यस्य हेतुत्वापेक्षया सामान्यज्ञानहेतुत्वेऽपि स्वा
श्रयभिन्नघटतरावृत्तित्वविशिष्टसकलघटवृत्तित्वरूपघटत्वत्वादिना हेतुत्वापेक्षया घटत्वत्वाघटितघटत्वज्ञानस्य हेतु राम०
त्वं लघ्वियिति वाच्यं घटत्वादिसामान्यस्य तत्तद्व्यक्तित्वेनैव हेतुत्वसंभवात् घटत्वाघज्ञानदशं भेवन मनःशायां विशेषणाज्ञा

त्वविरहे रोगापत्यसंभवादिसत्त्वाच्चाह अनीताद्यनुरोधादित्यादिनाऽनागतादौ परिग्रहः इदं वातीतानागतत्वाद
निरूप्यत्वस्याश्रयप्रत्यक्षानुरोधादिति तदर्थः तथा चातीतानागतसामान्याश्रयप्रत्यक्षे सामान्यस्य व्यभिचारेऽपि
कल्पे तुल्यासंभवात्तज्ज्ञानस्य हेतुत्वमाह तमिति भावः अत्रैतत्प्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति निर्विकल्पकं साधारणाद्य ल्पकादि
त तत्त तद्विषयकज्ञानत्वेनैव हेतुत्वं अत्र च कार्यस्यास्वप्रकारीभूतसामान्याश्रयनिष्ठविशेष्यत्वं कारणस्य तु स्वविषयीभू
तन्नत् तसामान्याश्रयनिष्ठविषयत्वं प्रत्यासत्तिरतो नातिप्रसंगः न चैवं निर्विकल्पकोत्तरं जातस्य घटत्वविशिष्टप्रत्यक्षस्यापि
यावद्घटविषयकत्वापत्तिः इष्टत्वात् सामान्यप्रकारकज्ञानत्वेन हेतुत्वोपगमेपि निर्विकल्पकत्वजातीयक्षणेया
वद्घटावगाहिप्रत्यक्षोत्पत्त्या स्मरणाविलंबस्य प्रायथानिरीतमत्वात् न च तद्विषयकत्वतत्प्रकारकत्वयोः समशरीर
कत्वेयात तद्विषयकत्वेनैव हेतुत्वमित्यत्र विनिगमकाभावः प्राथमिकविशिष्टप्रत्यक्षे सौरभादिविशेष्यकज्ञानोत्तरं ज्ञाय
माने सुरभिचंदनमित्यादिप्रत्यक्षे व्यभिचारसंभवादेव तत्प्रकारकज्ञानत्वेन हेतुत्वस्यासंभवात् न च स्वप्रकारीभूत

तत्तत्सामान्याश्रयनिष्ठालौकिकमुख्यविशेष्यतासंबंधेन तत्तत्सामान्यप्रकारकप्रत्यक्षं प्रत्येव तत्तत्सामान्यप्रकारकज्ञा
नत्वेन हेतुत्वं वाच्यम् अतो नोक्तदोषः कार्यतावच्छेदकसंबंधस्य गुरुत्वापत्तेः चंदने सौरभमित्यादिज्ञानोत्तरं जायमानस्य सुरभि
चंदनमित्येवं सौरभाश्रयमुख्यविशेष्यकमानसप्रत्यक्षस्य सौरभप्रकारकज्ञानाजन्यत्वेन तथापि व्यभिचारतादवस्थ्या
न च तद्विषयकज्ञानत्वेन हेतुत्वे घटवद्भूतलमित्यादौ संसर्गविधया संयोगज्ञानादपि संयोगवत्त्वेन तदाश्रयप्रत्यक्षापत्तिः अतस्त
नै त्प्रकारकज्ञानत्वेनैव हेतुत्वं युक्तमिति वाच्यं संयोगविशिष्टबुद्धिसामान्यं प्रति सांसर्गिकान्यसंयोगविषयताकज्ञानत्वेन हे
तुतया तद्विरहादेव तत्र संयोगविशिष्टज्ञानासंभवात् सांसर्गिकसाधारणतद्विषयताकज्ञानत्वेन तद्विशिष्टबुद्धौ हेतु
तत्र त्वस्वीकारे तु तत्रापि संयोगविशिष्टज्ञानोत्पादेन तस्य यावत्संयोगाश्रयविषयकत्वापगमे ऽपि क्षत्यभावात् वस्तुतस्तु
तद्विषयकज्ञानत्वमात्रेणाहेतुत्वे समवायेन घटत्वप्रकारकज्ञानात्कालिकादिसंबंधेन तदाश्रयस्य कालादेः प्रत्यक्षापत्त्या राम०
तत्संबंधावच्छिन्नतत्प्रकारकतदाश्रयप्रत्यक्षं प्रति तदितरसंबंधानवच्छिन्नतन्निष्ठविषयताकज्ञानत्वेनैव हेतुत्वं वाच्यं

ननु तत्संबंधावच्छिन्नतत्प्रकारकज्ञानत्वेन तथा सति सुरभिचंदनमित्यादि मानसोपनीतभाने व्यभिचारमियात तद्बुद्धिमि प्रत्युक्त
न्नत्वस्य तत्प्रकारकज्ञानाव्यवहितोत्तरत्वस्य वा कार्यतावच्छेदकेऽनुप्रवेशो महागौरवापत्तेः नचैकसंबंधेन तत्प्रकारकप्रत्य
य क्षदशायां संबंधांतरेण तत्प्रकारकप्रत्यक्षे ऽदिबाधकसंभवस्तदानंतरकाले संबंधांतरेण तदाश्रयप्रत्यक्षे सत्येव प्रतिबंधकः स्व
स्य स्यथापुनरिष्टमेव तदानीं संबंधांतरेण घटत्वस्याश्रये प्रत्यक्षं स्यात्तद्विषयकज्ञानत्वेनैव लघुना हेतुत्वं ननु तदितराघटत्वभावि
शेषावितमिति वाच्यं समवायेन घटत्वप्रकारकानुमित्यनंतरं ज्ञानस्य तत्संबंधेन घटत्वाश्रयप्रत्यक्षस्य संबंधांतरेण तदाश्र
यविषयकत्वस्य दुर्वारतापत्तेः तादृशानुमितिदशायां संबंधांतरेण घटत्वस्य परामर्शस्याभावादेव संबंधांतरावच्छिन्नघ
नु टत्वप्रकारकज्ञानानुत्पत्त्या तन्निर्वाहकस्याकल्पनादिति चेदेवं नर्निंद्रियभेदेन कार्यकारणभावस्य परित्यागे घटत्वप्रकारक नाना
त्स्मा तदाश्रयप्रत्यक्षे भवत्कारिणि वा कृषंकचिदभ्यर्हितं ज्ञायते तदुत्पत्तौ किं नियामकमित्यत आह स्वापेक्षणीयं चेति क्रमादोषात्वादि
भ्रमत्वनकदोषदशायां चक्षुःकरणकबोधसामग्रीसत्त्वेऽपि क्रमत्वादिप्रकारकं न तदाश्रयस्य वास्तुषंज्ञायते उत्पन्नस्य तद्

सौदामिनीसंपातः तडित्संयोगः २

न्तु र्भवत्वबोधोऽस्मरणं सामग्र्यंतरमिति तथा च तत्तद्विशेषसामग्री तत एव चाक्षुषस्पार्शनादिनियम इति भावः कारणांतरमु
पेक्ष्य सामग्र्यंतरपर्यंतापेक्षायाः फलमाह अत एवेति अंधतमसं निबिडं तमः आलोकस्य पक्षादसत्त्वलाभाय सौ
दामिनीपर्यंतानुसरणं चरमं विद्युत्संपातजन्यचाक्षुषोत्तरं द्रव्येति द्रव्यत्वसामान्यमधिकृत्योक्तं अत्र दोषवि
शेषवशात्तमोधर्मिकस्यैव चक्षुः करणकद्रव्यत्ववत्ताबोधस्य सामग्री सत्ता चरमं निखिलद्रव्यचाक्षुषोदुर्वार एव पर
धर्मि न्तु उक्तस्थले घटत्वादिना घटादेश्चाक्षुषसंज्ञानवारणाय सामग्र्यपेक्षा वाच्येति विभावनीयं द्वित्रिसाक्षात्कारस्यो न्तु
तथा च पगमेऽस्य भावादाह संज्ञानइति नादृशचाक्षुषधारानुभवबाधितेति भावः अत्र केचित् चक्षुरादीन्द्रियांत
र्भावेन सामान्यज्ञानस्य हेतुत्वे सौरभत्वप्रकारेण यत्किंचित्सौरभज्ञानोत्तरं ज्ञायमानस्य सुरभि चंदनमित्यादि चाक्षु
षस्य पूर्वानुपस्थितत्याव त्सौरभमुख्यविशेष्यकत्वापत्तिः सामान्यप्रत्यासत्तेरविशिष्टत्वात् न चेष्टापत्तिः बहिरिंद्रिय रामं०
स्य स्वायोग्य मात्र निष्ठमुख्यविशेष्यताकज्ञानाजनकत्वनियमात् अस्मन्मते तु सौरभत्वसामान्यज्ञानस्य सौर

मत्वप्रकारकतदाश्रयघ्राणजन्यत्वावच्छिन्नंप्रतिताद्दृशमानसत्वावच्छिन्नंप्रसिद्धंविशिष्यहेतुत्वकल्पनानन्तताद्दृशांचा वा
त्युपमि क्षुषमित्याहुः तन्न सौरभमुख्यविशेष्यकज्ञानस्यानुमितित्वाद्बोधघ्राणजादिस्वरूपस्यैवपारमार्थिकतयातन्मुख्य
विशेष्यकानुमित्यादिसामग्रीविरहादेवतदानीताद्दृशज्ञानोत्पत्यसंभवादनुमित्यादिभिन्नस्यताद्दृशज्ञानस्यालीक
तयायाद्दयितुमशक्यत्वात् वस्तुतोमुख्यविशेष्यतासंबंधेनसौरभत्वादिप्रकारकचाक्षुषंप्रतितादात्म्येनसौरभत्वादि त्विकं
नागंधत्वादिनावाप्रतिबंधकत्वान्ननिरासः ताद्दृशसंबंधेनतथाविधचाक्षुषंतुघ्राणादावेवसौरभत्वस्यभ्रमरूपंसुलभं न
वसौरभत्व[redacted]प्रकारकेतिवाच्यंः प्रमेयत्वादिसामान्यप्रत्यासत्याताद्दृप्येणसौरभमुख्यविशेष्यकचाक्षुषस्यसकलसंमत
तु त्वात्तत्रापिचक्षुर्योग्यमात्रविशेष्यकत्वोपगमेतन्नापादेयं नचैवंघटाद्युपनीतचाक्षुषस्यापिघ्राणादिमुख्यविशेष्यकत्वं
कार्यि स्यात् अकारणाभावस्यैवापादकत्वादिष्टापत्तौचोपनीतंविशेषणतयैवभासतइत्यस्यविरोधइतिवाच्यं मुख्यविशे
य ष्यतयाद्रव्यचाक्षुषत्वावच्छिन्नंप्रतिचक्षुरादिलौकिकसन्निकर्षाभावविशिष्टज्ञानत्वेनविषयतयाप्रतिबंधकत्वात्स्व

तएव सत्यपि भूतत्वादिज्ञाने तेन लौकिकसन्निकर्षदशायां तन्मुख्यविशेष्यकं लौकिकप्रत्यक्षमिति ध्येयं गंधादेस्त्वाक्ष
६ षत्वोपपत्तये चाक्षुषादिकं प्रति तादात्म्येनाक्ष्यं गंधत्वादिना प्रतिबंधकत्वं वाच्यं तथा च तत्रैव लौकिकविषयतामात्रे
न प्रतिबध्यताघटकः संबंधः किंतु मुख्यविशेष्यत्वनिर्विकल्पकविषयत्वयोरन्यतरैव संबंधानुगमस्य स्वरूपसंबं दि
धेन हेतुतास्थले एवास्वसृस्तितत्वात् तत्प्रकारताया विषयत्वं वा तादृशसंबंधो वाच्यः सुरभिचंदनमित्यादिचाक्षुषे चं
दनांशे प्रकारतैव सौरभत्वांशे विशेष्यता न त्वधिके तु न प्रतिबंधकसंबंधैवादेश्चाक्षुषज्ञानं न सौरभमुख्यविशेष्यक ज्ञ
तत्वं सं मित्यपि वदंति केचित्तु घटत्वपटत्वादीनां तद्विषयकज्ञानानां वा बहूनां प्रत्यासत्तित्वे कार्यकारणभावानंत्यप्रसंगा
श्व त् सर्वत्र नित्यज्ञानव्यक्तिरेव प्रत्यासत्तित्वं तस्याः स्वाश्रयविशेष्यकप्रत्यक्षत्वावच्छिन्नं प्रत्येव तद्व्यक्तित्वेन हेतुत्वं
नित्यज्ञानव्यक्तेः सर्वदा सत्वात् यत्किंचित्सन्निकर्षदशायां न तद्दोषश्चरनिर्विकल्पकोत्पत्त्यात् तदुत्तरं सर्वज्ञापत्तिरतः स्वाश्र रात्म०
व्य यविशेष्यकत्वानुसरणं स्वाश्रयस्तु विषयतया ग्राह्यः नवतज्ज्ञानं तत्पाश्रयत्वादिविशेषाद्धटइत्याकारकप्रत्यक्षका
स्वाश्रयविषयकप्रत्यक्षत्वोक्तौ तु र

सामान्य२ वर मपि३

स्यापि रकप्रत्यक्षकाले पटत्वेन पटप्रत्यक्षापत्तिः पटत्वज्ञानदशायां इष्टापत्तेः अन्यथा विशेषणज्ञानविरहादेव तदसंभवात् नापि
घटस्य घटत्वेनैव प्रत्यक्षदशायां तादृशपरोक्षपटादेः प्रत्यक्षापत्तिः घटत्वप्रकारेण पटस्य ग्रहस्य भ्रमतया तज्जनकदोषविरहादेव तस्याप्य
तु संभवात् अन्यथा घटत्वादिज्ञानस्य प्रत्यासत्तितायां द्रव्यत्वघटत्वयोः रूपस्थितौ द्रव्यत्वेन पटप्रत्यक्षदशायां घटत्वेनापि प
टस्य प्रत्यक्षापत्तेर्दुर्वारत्वात् तादृशदोषसत्त्वे च तथाविधभ्रमस्येष्टत्वात् न च विनिगमनाविरहाद्गगनाभावादीनां स्व
त्त तत्तत्संयोगाभाववत्कीनां च तत्तद्व्यक्तित्वेन स्वाश्रयप्रत्यक्षं प्रति हेतुतापत्तिरिति वाच्यं गगनाद्यभावानामन्यथासिद्धत्वात् विशेष्यक
कार्यमात्रहेतोर्नित्यज्ञानस्य स्वाश्रयप्रत्यक्षेऽप्यनन्यथासिद्धत्वात् गगनाद्यभावानां तादृशपरोक्षहेतुत्वेऽपि लाघवसंभ
वाच्च । घटत्वादिज्ञानत्वेन हेतुतायां घटत्वादिप्रकारकतदाश्रयप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवापत्तेः सुरभिचं
दनमित्यादेः सौरभत्वाद्यविशेष्यकप्रत्यक्षस्यानुरोधादेव सौरभत्वादेर्ज्ञानलक्षणायाः स्वीकार्यत्वादित्याहुः ननु सा
मान्यं यदि न प्रत्यासत्तिः किंतु तज्ज्ञानं तदा ज्ञानलक्षणया सह तस्याः को भेद इत्यत आह इयं द्वेति सामान्यलक्षणा

१

चेत्तर्थः इतरथा ज्ञानलक्षणातस्यैति प्रत्यासत्तिरित्यनुषज्यते तथाच कार्यकारणभावभेदादेव प्रत्यासत्त्योर्भेदव्यवहार इ
तिभावः स्यत एवेति अत एव ज्ञानलक्षणाया अतिरिक्तप्रत्यासत्तित्वस्वीकारादेकस्य [illegible] या सौरभत्वज्ञानात्तुपस्थितस्यानंतरं सु न्य
रभिर्गंध इति वस्तु सुरभिचंदनमित्याकारकं सौरभत्वप्रकारेण चंदनस्य प्रमात्मकं चाक्षुषं तत्र सौरभत्वज्ञाते भानं न स्यात्
न हि तत्र सुरभिगंधस्य भानसंभवः येन सामान्यलक्षणायास्तद्धर्मप्रकारकतदाश्रयप्रत्यक्षं प्रत्येव हेतुतया सौरभत्वप्रत्या
सत्तिः कार्यतावच्छेदकतयैव सौरभत्वज्ञाते भानं भविष्यतीति संभावनीयं चक्षुषो बहिरिंद्रियत्वेन स्वायोग्यमुख्यविशेष्य
स्य कज्ञानाजनकत्वनियमात्पूर्वानुपस्थितेन सुरभिगंधस्य तत्र भानासंभवेन उक्तरीत्या तद्गतज्ञातेरपि तत्र भानासंभवा
दिति भावः इत्यादाविस्यादिपदेन अत्र मांतरस्य तदनुव्यवसायस्य च परिग्रहः यत्तु ज्ञानस्य तदिंद्रियजन्यत्वं नियामकमि
या ति पूर्वमतेनायं ग्रन्थः तथाच सौरभत्वेन सौरभस्मरणानंतरं जायमाने सुरभिचंदनमित्याकारकचाक्षुषप्रमायां सामा रा०
न्यप्रत्यासत्त्या न सौरभत्वस्य भानसंभवः कारणीभूतस्य सौरभत्वचाक्षुषस्याभावात् अतो ज्ञानलक्षणाप्रत्युक्त

न्यासत्तिरितिमतंतन्मंदंज्ञानस्यतदिंद्रियजन्यत्वापेक्षायंसुरभिगंधस्यापितत्रभानासंभवेसौरभत्वजातिपर्यंतानुस न
रणस्यसंदर्भविरोधापत्तेः अत्रेदंतत्वंयद्यपिघटत्वादिप्रत्यक्षेतदलौकिकप्रत्यक्षेवानतद्गोचरज्ञानत्वेनज्ञानलक्षणा
याहेतुत्वंघटत्वादिनिर्विकल्पकेप्रमेयत्वादिसामान्यलक्षणाजन्यघटत्वादिप्रत्यक्षेचव्यभिचारात् तथापिलौकिका
लौकिकसाधारणघटत्वादिप्रकारकप्रत्यक्षमात्रंप्रत्येवघटत्वादिज्ञानत्वेनहेतुत्वं अतएवप्राथमिकस्यघटत्ववैत्र
त्वादिप्रकारकप्रत्यक्षस्यघटत्वघटत्ववैत्रत्वादिनिर्विकल्पकंविनानुपपत्तेस्तत्सिद्धिरप्यावश्यकी पूर्वानुभूतवस्तुमा
त्रस्यैवतत्तात्वेनघटत्वाद्यात्मकतत्तत्प्रत्यभिज्ञानेनुरोधेनैवपरैरप्युक्तकार्यकारणभावस्याभ्युपेतव्यत्वात् नचैवंज्ञ
नसविकल्पकस्यैवप्रत्यासत्तित्वमितिप्राचीनगायाविरोधस्तस्याकिंचित्करत्वात्सर्वत्रघटादेरुपनीतभानस्थलेस
वतयनियमसंभवाच्च द्रव्यत्वादिप्रकारेणघटादेरुपनयसत्वेपिघटत्वादिप्रकारेणतस्योपनीतप्रत्यक्षानुदयेनघट
प्र त्वादिनातत्तद्घटादिंकारकप्रत्यक्षंप्रतिघटत्वादिप्रकारेणैवतत्तद्घटाद्युपनयस्यहेतुत्वात् अतएववैशिष्ट्यघटत्वयोर्निर्वि

कल्पकोत्तरं घटे घटत्वस्यैव घटत्वेपि न घटस्य वैशिष्ट्यावगाहि प्रत्यक्षं द्रव्यत्वघटत्वादिप्रकारेणैव घटादीनां विशिष्टबुद्धेः
10 द्वे पारमार्थिकतया तैर्द्वितुभूतस्य घटत्वादिप्रकारेण घटादिज्ञानस्य तदानीमसत्वात् न चैवं निर्विकल्पकोत्तरं विशेष्यवि
शेषणाभित्यादिक्रमेणापि घटवदित्याकारकं प्रत्यक्षं न स्यात् इष्टत्वात् ज्ञातीतरनिष्ठप्रकारतायाः किंचिदवच्छिन्नत्वनिय
मात् द्रव्यगुणकर्मणां निरवच्छिन्नप्रकारत्वानतुभवात् न च निर्विकल्पकस्याप्रत्यक्षत्वे स्वविषयीभूतघटाद्युपधानेन त्वा
तस्य प्रत्यक्षापत्तिः विषयानुपधाने तज्ज्ञानादिप्रत्यक्षस्यालीकतया विषयोपनायकविरहादेव मनःसंनिकृष्टस्यैतस्या पि
तीन्द्रियत्वोपगमादिति वाच्यं सत्यपि सन्निकर्षे प्रत्यक्षसामान्यं प्रत्येव दृष्टत्वादिनेव निर्विकल्पकत्वेनापि तादात्म्य
संबंधेन विरोधित्वकल्पनादेव निर्विकल्पकस्याप्रत्यक्षत्वात् अन्यथा सुखत्वादिनिर्विकल्पकस्य स्वविषयीभूतसु
खत्वाद्युपधानेन साक्षात्कारस्य दुर्वारतापत्तेः सुखत्वस्य निर्विकल्पकद्वय सुखत्वे लौकिकस्यैव मनःसन्निकर्षस्य राम०
त सत्वादुपधाने न तन्निर्विकल्पकस्य प्रत्यक्षे बाधकाभावादिति। यत्तु घटादिप्रकारकप्रत्यक्षं प्रत्येव घटादिज्ञानं स्वघट्य सेन

पिर

घटत्वेन

रंजानामी

हेतुत्वे घटादिविशेष्यकं घटो द्रव्यमित्याकारकं मानसोपनीतभानं तस्यादिति तन्न घटादिधर्मिकद्रव्यत्वाद्यसंसर्गा
ग्रहादिवशादेव मानसधियो घटादिविशेष्यकत्वसंभवात् घट इत्येतावन्मात्राकारस्य बाधनिरोधप्रतिवध्यमानसप्र
त्यक्षस्यासत्वेपिक्षत्यभावात् नचैवं घटादेरनुपस्थितिदशायां तद्विशेष्यकं मानसप्रत्यक्षं स्यात् द्रव्यत्वधर्मिकसंसर्गाग्रहस्य
तदानीमपिसत्वात् इति वाच्यं घटप्रकारकप्रत्यक्षत्वस्य घटनिष्ठलौकिकविशेष्यताकप्रत्यक्षत्वव्यापकतया तदवच्छि
न्नं प्रति हेतुभूतस्य घटज्ञानस्य विरहादेवानुपस्थितघटादेर्विशेष्यविधया मानसग्रहासंभवात् घटो द्रव्यमित्यादिमा
नसस्य घटे द्रव्यत्ववैशिष्ट्याकारकत्वनियमात् अत एवोपनीतं विशेषणतयैव भासत इत्यभिधाय मानसेत्वनियम
इति प्राचीनैरप्युक्तमित्यलं पल्लवितेन ॥ ॥ व्याप्तेः सामानाधिकरण्यरूपत्वे परामर्शस्य प्रमत्वापत्तिः अतो भा
वार्थमाह ब्रूमेत्यादिना न्याय्यवादाह वह्निमानिति न च केवलान्वयित्वव्याप्तिः व्यतिरेक्यनुमानस्यैव केवलान्वयिनि हेत्व
घनुमानस्य परैरनभ्युपगमात् परैः स्वीकारादिति भावः केवलान्वयिनः संयात्वपि तत्र घुमाल्पिमाह साध्यसंबंधिते

तिच्छवच्छेदकत्वं स्वरूपसंबंधविशेषइतिहृदयं तेनमणुक्तावच्छेदकत्वघटनपागुरुत्वानवकाशः सर्वेतिसामानाधिकर
रण्यापत्तिलक्षितस्यधूमत्वादेःसकलधूमनिष्ठत्वादितिभावः व्याप्तेर्नानात्वेइतिसामानाधिकरण्यस्वरूपत्वयेत्यादिःतत्र
कृ पर्वतीयधूमे अयथानुभवस्मरणयोःसमानप्रकारतामात्रेणैवहेतुहेतुमद्भावेसर्वांशग्रहीतेस्यापिस्मरणेभानंस्यादि
तिस्मृतेरगृहीतग्राहित्वेननप्रमात्वंप्रामाण्यापत्तिरित्यन्यथाथेोत्पादयति शक्यनुभवेति अत्रशक्यस्मृतेरिवशक्यनुभवस्या
देव पिसाक्षात्तैशाब्दधीजनकत्वेहेतुपदंयथाश्रुतार्थकमेव अन्यथातत्प्रयोजकपरंबोध्यं एवमितिगोत्वप्रकारेणगोधर्मि
कशक्तिग्रहस्यशाब्दधीहेतुत्वइत्यर्थःधर्मिणाशक्तिमत्त्वेपितद्विषयकत्वस्यशाब्दधीजनकतानवच्छेदकत्वात्
तत्राशक्यत्वव्यवहारइति कुत्रशक्तिवादिनःश्रीकरस्यमतमनुसृत्यायंजातौशक्तौचेजिज्ञातिविषयत्वनैवेति ज्ञा परिहरति
तिप्रकारकत्वेनैवेत्यर्थःतेनव्यक्तिसमानप्रकारकत्वेनहेतुत्वस्यनविरोधेऽननुभावयतिशब्दबोधंजनयति·तदर्था राम॰
ज्ञातिशक्तिवादस्यार्थातःकस्यचिन्मतमाहपश्वादीतिःपशुत्वस्यसंस्थानात्मकत्वात्·उच्चैःश्रवोभिन्नतयातेजस्त्वा

दिनासांकर्योश्च॰ लोमवल्लोमलवत्त्वमेव पशुत्वं तस्यचोपाधित्वे नश्यकर्मसमं तुल्यवित्तिवेद्यत्वाभावान्नादृशोपाधि
विशिष्टधर्मिणेयवत्वरैः शक्तिस्वीकारादितिभावः। पृथिवीत्वादिमत्येकव्याप्यायदिनानैवपृथिवीमात्रवृत्तित्वेपशुत्वजा
तिः पशुपदशक्यास्यात् पीतसुवर्णस्यवदेवैः अवसापितैजसमवादस्यतेजोभागेपीपष्टंभकतया अप्युपपत्तिस्त व
डा दाह॰ लिंगमुपादीति॰ यजेतइत्यादौकार्यत्वप्रकारेणाख्यातादौलिङ्गः शक्तिग्रहेयागविषयकंकार्यमित्यन्वयबोधेयोग्यता
व्यक्ति बलात् तादृप्येणाप्यपूर्वलाभस्यपरैर्वर्ण्यमानत्वादितिभावः। कार्येलिङ्[illegible]दिशक्तेस्तार्किकैरनंगीकारादेककार्येश
स्तेः क्तियहाद्दपरकार्यस्यबोधानुपपत्तेः शंकितुमशक्यत्वादाह परेति॰ परैरित्यान्यायमतेन॰ यद्यपिगोपदस्यनानार्थत्वे
नयत्रवाक्यत्वप्रकारेणवाक्यसंद्रियत्वप्रकारेणइंद्रियस्यचावबोधकंगोपदंतत्रवाक्यत्वादेरुपाधितयातद्विशिष्टव्यक्तौ
शक्तेः परेषामपिस्वीकाराद्धवादिपदेष्वपीतिमूलंतदभिप्रायेणैवसाधुसंगच्छते तथापिलाघवेनगोत्वादिशक्तेनगवादि
व पदेनलक्षणयैवाक्यत्वादिप्रकारकबोधोपपत्तौ नवाक्यत्वादिविशिष्टेगोपदस्यशक्तिर्गौरवादित्याशयेन तादृशाभि
न्यायमतेनसमर्थनंचेयस्यरसः

वर्त्तितिः प्रायोमूलस्यतेऽपि दर्शितिः। अत्र गोपदं गोत्ववदित्याकारकस्य पदविशेष्यकशक्तिज्ञानस्य कक्षाद्धीहेतुत्वात् गोत्वप्रका
रतामादायैव समानप्रकारकत्वेन हेतुत्वसंभवात्। यथा अत्र तत्र भवन्मूलं सम्प्रगितितु मैथिलाः। यद्विशिष्टज्ञानमिति। ज्ञानस्य
12 त्प्रकारकं ज्ञानमित्यर्थः। तेन नित्यज्ञानेन व्यभिचारः परेषां च अर्थविशेषणत्वं न दोषायेति भावः। तद्धीसाध्यत्वं च समवा
यसंबंधावच्छिन्नं ग्राह्यं। नातः परेषामीश्वरज्ञानजन्यत्वासिध्यैवार्थांतरं अथाभावत्वादिज्ञानं विना अपि तद्विशिष्टप्रत्यक्षो
त्पादाद्व्यभिचार इत्यत आह अभावत्वेति। अन्यथाविनाप्यभावत्वज्ञानमलौकिकस्याप्यभावत्वविशिष्टप्रत्यक्षस्य प्रसंगा
ता दलौकिकान्यतरप्रकारकं ज्ञानं प्रमितितत्वाभ्यां तेन हेतुत्वे च गौरवादिति भावः। यत्वतत्वयोरननुगमादाह वह्नीति। वह्निवि
लक्षणज्ञानत्वेनेत्यर्थः। वैलक्षण्यं च प्रत्यक्षत्वे सति वह्निप्रकारकत्वमनुमितित्वादिकं वा। नातः पूर्ववद्व्यभिचारः। अन्य
वह्न्यंतरज्ञानजन्यत्वेनासिद्धसाधनं। न च वह्नित्वेन गुंजादेर्धर्मव्यापकत्वग्रहोत्तरं जायमानानुमितेर्वह्न्यंतरज्ञानजन्यत्व रफ०
बाधात् नैवं प्रकृतवह्निज्ञानजन्यत्वसिध्यर्थं सामान्यलक्षणास्यादिति वाच्यं। गुंजायां वह्नित्वग्रहस्य तद्धी नानुमितेस्त्व
र्व२ र२

गुरुमतेऽसंभवात्तेषामन्यथाख्यात्यभावात्स्य तत्स्याह तद्वद्गृहीतिनत्वु अयं देशो दंडिमानित्याद्यनुमितौ विशेषणतावच्छेदकी
भूततद्दंडभानार्थं सामान्यलक्षणापत्ते राह विशिष्टेत्यादि· नन्वेवं विशेषणतावच्छेदकप्रकारकज्ञानविरहेपि सुरभिचंदन
नमित्यादि विशिष्टवैशिष्ट्यधीः स्यादत आह वस्तुत इति· तथा च तादृशबुद्धेः प्रत्यक्षादिनियतत्वेन न तदानीं प्रत्यक्षादिसाम
ग्रीविरहादेव न तादृशं ज्ञानमिति भावः। विशेषणतावच्छेदकादीनामित्यादिपदाद्विशेष्यादिसंग्रहः। तादृशं विशिष्टवैशिष्ट्या
वगाहि· अनुमित्यादिष्विति· तादृशमिति लिंगव्याप्त्यादेनानुपस्थि ते· तद्रूपेण विशेषणतावच्छेदकरूपेण· येन रूपे
णव्यापकतया शाब्दे च ग्रहः तेन रूपेणानुमितेः शाब्दस्य चोत्पत्तेरिति भावः। अत एव इंद्रियसंनिकर्षादेर्नियामकत्वा
देव तद्भानार्थं विशेषणतावच्छेदकभानार्थं ननु विशेष्यादिसंनिकर्षेण दंडत्व दंडयोर्निर्विकल्पकोत्तरं दंडे दंडत्वस्येव दं
त डत्वादौ दंडादेर्विशिष्टप्रत्यक्षानुत्पत्त्याऽवश्यं दंडत्वादिना दंडादेर्विशिष्टबुद्धौ विशेषणतावच्छेदकीभूत दंडत्वादिना दंडादेर्ज्ञा त
नं मृग्यमुक्तानः शिशवः कपोताः खलेपयथामी पुणपत्यं वीति हेतुः एवं दंडो रक्तो न वेति संशयोत्तरं रक्तदंडवानिति विलक्षणवो

तर

13 धातुप्रत्यासत्त्ये विशेषणतावच्छेदकप्रकारकनिश्चयोऽवश्यं हेतुरत आह स्वस्तु चेति: स्मृतौ व्यभिचारात्तदाह शाब्दज्ञानमात्रे हे
तुत्वासंभवादाह· प्रत्यक्ष इति· शाब्दबोधो हि न विशिष्टवैशिष्ट्यावगाही खले कपोतन्यायेन तत्स्वीकारादिति भावः विशेषण
तावच्छेदकांशे धर्मितावच्छेदकासत्त्वसत्त्वाभ्यां विशिष्टवैशिष्ट्यबुद्धेर्द्वैविध्यादाद्याभिप्रायमुदाहृत्य द्वितीयमाह विशिष्टहृदं संयो
गवानिति· यत्किंचिदिति· तथा च विशेषणाव्यक्तेः पूर्वमभानेपि न क्षतिरिति भावः व्यतिरेकेणाघटादेरन्वयेन च गोत्वादिसा
ध्यकानुमितेर्दृष्टांतत्वसंभवादाह विशेषणज्ञानत्वेन हेतुत्वस्यापि· निरस्तत्वादित्यग्रेणान्वयः विशेष्यज्ञानादीत्यादिपदे
न संबंधज्ञानसंग्रहः कारणत्वापत्त्येति· तथा च तद्बुद्धिद्वाप्यप्रपेक्षकत्वमिति भावः विशेष्यधियो हेतुत्वे वक्ष्यमाणेनाव्याप
त्तेराह मानाभावेन चेति· एतेन मानाभावेन निरस्तमित्यन्वयः ननु सामान्यलक्षणाजन्यज्ञाने संनिकृष्टघटांतरस्या
पि विशेष्यत्वात्तस्य च प्रागनुपस्थितत्वेन विशेष्यज्ञानस्य हेतुत्वं दुर्घटमत आह जन्यतां चेति· निर्विकल्पकमनुपस्थित राम०
स्याप्युपस्थापकं· तथा च तत्रानुपस्थितघटांशे निर्विकल्पकात्मकमेव यावद्धर्मावच्छेदकज्ञानमतो नोक्तदोषः घटत्वा

प्रसंगादत्रआ घटत्वप्रकारक१

दिसामान्यस्यचखेतरप्रकारत्वानिरूपितघटनिष्ठविषयतासंबंधेनैवंशाप्रत्यक्षंप्रतिहेतुत्वंवाच्यमतोविनापिघट
त्वस्यज्ञानंद्रव्यत्वादिसामान्यज्ञानात्घटस्यप्रत्यक्षोत्पादेपिनव्यभिचारइतिभावः।नन्वेवंमेयत्वादिसामान्यलक्षणाया
घटत्वपटत्वादिघटपटादिपूर्वानुपस्थितयावद्वस्तुनिर्विकल्पकोत्पत्त्युत्तरकालंघटेदौघटत्वादिनिष्ठपेवाधकाभा
वेनतदुत्पत्त्यासर्वज्ञःस्यात्·नचेष्टापत्तिःतथासतिप्रमेयत्वादिसामान्यप्रत्यासत्तिजन्यज्ञानोत्तरंस्वयंघटोनवाघटो
द्रव्यंनवेत्यादिसंशयानुपपत्तेरहसार्वज्ञे[redacted]तिःयत्तुकैश्चिदुक्तंमेयत्वादिसामान्यलक्षणयाघटत्वज्ञानोत्पत्तिकाले
नि तद्वृत्तिधर्मस्यापिविकल्पकजननादुक्तस्कालंघटेघटत्वस्येवघटत्वेपितद्वृत्तिधर्मोणामवश्यंभानंसामग्रीसत्वात्तथा
चघटत्वांशेऽन्यप्रकारकज्ञानासंभवान्नसर्वज्ञापत्तिरिति·तत्तुच्छं·घटत्वांशेऽन्यप्रकारकस्येवतदंशेऽन्याप्रकारकस्यापि
ज्ञानस्यसामग्रीसत्वेनोत्पत्तिसंभवात्जातिमान्घटइत्याकारकप्रत्यक्षानुरोधेननिरवच्छिन्नघटत्वादिप्रकारकज्ञानं
ता प्रतिनिरवच्छिन्नघटत्वादिविषयकज्ञानत्वेनहेतुत्वात्।तत्रयथाघटांशेघटत्वमिवघटत्वांशेजातित्वमवगाहमानस्य पि

14

ज्ञानस्योत्पत्त्या ज्ञातिमात्रे विषयी: सर्वदा स्यात् ननु ज्ञातिमान् घट इत्याकारिकेति दिक्। तस्यास्तद्जनकत्वेविति०
सामान्यप्रत्यासत्ते निर्विकल्पकजनकत्वेत्वित्यर्थः तत एवेति· सामान्यजन्यज्ञाने व्यभिचारादेव विशेष्यज्ञानं न कार
णमित्यर्थः ननु धर्मिज्ञानस्य संशयहेतुत्वमानाभावादसन्निकृष्टधूमादीनामज्ञानेपि तद्धर्मिकः संशयो भविष्यति त्य ती
र्थे तद्धर्मिज्ञानार्थं प्रत्यासत्तिकल्पनमत आह धर्मीत्यादि संशय एवेति· संदेहस्य प्रत्यक्षत्वात् तया धर्मीन्द्रियसंन्निकर्षं विना रूप
तद्विषयकत्वासंभवादिति भावः ननु संशये धर्मिभानार्थं धर्मितावच्छेदकप्रकारकं वास्यान्विदेव ज्ञानं हेतुरस्तु कृ
तं सामान्यलक्षणयेत्यत आह धर्मितेति· अविवादादित्यस्य सामान्यप्रत्यासत्तावित्यादिः अविवादमेव विवृणोति·
तद्धर्मेत्यादि· प्रकारकेति· यथा च सामान्यप्रकारकत्वेनैव हेतुत्वं न तु तद्विषयकत्वमात्रेण तथोक्तमथ स्तांदितिस्त त्
ध्यं॥ धूमत्वेनेति· तदवच्छेदेनेत्यर्थः तेन धूमत्वावच्छेदेन वह्निव्याप्यता निश्चयस्य धूमत्वप्रकारकत्वेपि तदुत्त राम०
रं धूमो वह्निव्याप्यो न वेति संदेहस्तादृशनिश्चये न धूमत्वस्यावच्छेदकत्वानवगाहनात्। यत्तु धूमत्वेनेत्यस्य धूमत्व

मात्रावच्छिन्नविशेष्यताकत्वपर्यवसानान्नोक्तदोष इति। तत्तुच्छं वह्निव्याप्यो धूमः सुंदर इति धूमत्वसामानाधिकरण्ये
व्य न व्याप्तिनिश्चयेपि वं[illegible]व्याप्यो धूमः कुरूप इति धूमधर्मिकव्याप्यभावज्ञानोदयादवच्छेदकत्वाकृष्टाहितनरवज्ञा
न्य नस्य प्रतिबंधकत्वादित्यत्र विस्तरः। व्याप्तिज्ञानं व्याप्तिनिश्चयः स्वप्रसिद्ध इति। धूमत्वावच्छेदेन व्याप्तिनिश्चयस्यैव
विरोधिनः सत्वादिति भावः। तद्विरोधितया धूमो वह्निव्याप्यो न वेति संदेहविरोधितया ससंदेहविरोधितया समसं
३ देहः नानुपपन्न इत्यस्य प्रसिद्धधूमे एवेत्यादिः तथा चोक्तं सामान्यलक्षणायेति भावः। ननु लाघवात्तदभावनि
श्चयत्वेनैव समानविशेष्यत्वप्रत्यासत्त्या तद्वत्ताबुद्धिं प्रति विरोधित्वान्नैवमतस्तत्र प्रतिबंदिमाह कथमित्यादिना
पृथिव्यादीति समानधर्मिकस्यैव ज्ञानस्य विरोधित्वे पार्थिवं तैजसं जलीयं च रूपं वायुत्वाभावव्याप्यमित्येवं निरा
ये रूपं वायुत्वाभावव्याप्यं न वेति रूपविशेष्यकसंशयो न स्यात् रूपमात्रे विरोधिव्याप्तिनिर्णयादतः समानधर्माव

15

चित्रविशेष्यताकज्ञानस्यैवविरोधित्वंवाच्यमितिभावः। नचेतिवाच्यमित्यग्रेऽन्वयः। संभावनयेति पार्थिवादिरूपभिन्नंरू
या पंनवेत्याकारकसंभावनयेत्यर्थः। तथा निर्णीतव्याप्तिकेष्वपि हेतुषु व्याप्तिसंदेहः संभावकाविरहाद्विशिष्टस्यैव समान
धर्मिकनिश्चयस्य प्रतिबंधकत्वादितिभावः। नन्वेवं प्रसिद्धधूम एव व्याप्तिनिश्चयेऽप्येतद्धूमातिरिक्तो धूमो न वेति संभावन ति
येव धूमो वह्निव्यभिचारी नवेति संशयसंभवात्कृतं सामान्यलक्षणयेत्यत आह विशेषतश्चेति। तथा च विशेषतो घट
त्वादिरूपेणापरिच्छिन्नानां प्रसिद्धधूमभिन्नानां धूमत्वाभाववत्त्वं निश्चयात्तदतिरिक्तस्याप्रसिद्धधूमस्यापरिच्छिन्नत्वार्थ या
मेव सामान्यलक्षणावाच्या तां विना संभावनापरिवासंभवादितिभावः। समानधर्मिकज्ञानस्य विरोधित्वे संभाव
नैव न संभवति कस्यापि तेजस्त्वं स्यादित्याह यत इति। तेषु विशेषदर्शनादिति। रूपेषु पार्थिवादिभिन्नत्वाभावदर्शना
दित्यर्थः। अतिरिक्ते पार्थिवादिरूपादतिरिक्ते। रूपान्तरत्वरूपमिति। प्रात्यक्षिकस्यैव विशेषदर्शनस्याकारोयं उद्देश्य राम०
तावच्छेदकविधेययोरैक्ये न तादृशशाब्दस्यासंभवादितिध्येयं॥ सामान्यरूपेणेत्यस्य विशेषतोपि विशेषदर्शने

माहद्रव्यादयइति॰ आदिपदेन कर्मत्वादिप्रकारेण कर्मसामान्यादेः परिग्रहः। रसादपइत्यत्र आदिपदाद्गंधत्वादि
प्रकारेण गंधस्पर्शादीनां संग्रहः ननु संभावनायाः यद्विशेष्यतावच्छेदकं तदंतर्भावेण समानधर्मिकनिर्णयः संभा
वनाविरोधी रूपान्यन्न रूपमित्याकारकनिर्णयस्तु न संभावनायां विशेष्यतावच्छेदकं यत्प्रसिद्धरूपभिन्नत्वं तदंतर्भा
वेणात : संभावनाप्यादेवेति यादृशरूपान्नुदानतदंतर्भावेणापि निर्णयमाह प्रसिद्धेत्यादि॰ प्रसिद्धरूपभिन्नं सर्वं न रूपमि
तिनिर्णयस्य चैवरूपं वायुर्वृत्तिनवेतिपर्यवसितो रूपं वायुत्वावच्छिन्नव्यभिचारि न वेत्याकारः संदेहो नोत्पद्यत इत्युक्तं रू तउ
पभिन्नमिति॰ उद्देश्यतावच्छेदकविधेययोरैक्येन प्रसिद्धरूपभिन्नं यद्रूपभिन्नं सर्वं न रूपमित्याकारस्य पक्षणाद्विशेष
दर्शनस्यासंभवादाह द्रव्यं रसादिवेति॰ अत्रापि प्रसिद्धेत्यादेः संबंधात्प्रसिद्धरूपभिन्नं यद्द्रव्यं रसादिवा तत्सर्वं न रूपमि
त्यर्थः तेन संभावनाधर्मितावच्छेदकांतर्भावलाभः रूपत्वकोटिकसंभावनायां रूपभेदनिश्चयो न बाधकः भिन्नविषय
कत्वात्॰ किंतु रूपत्वाभावनिश्चय एवेत्यभिधानेप्याह रूपत्वाभाववदिति तस्याइति॰ प्रसिद्धरूपातिरिक्ते रूपत्वसंभा

16

वनायाइत्यर्थः। नन्वेतादृशसंभावनाविरहदशायां रूपं वायुत्वाभावव्यभिचारी न वेति संशयोऽप्यसिद्ध एवेत्यत आह तदानी

सं मिति। तदानीं संभावनाविरहदशायां प्रसिद्धरूपे वायुत्वाभावव्याप्तिनिर्णये तादृशानुभवे विप्रतिपन्नं प्रत्याह व्यतिरेके स

ति। तद्धर्मिकतदभावनिश्चयाभावत्वेन हेतुत्वमपेक्ष्य संभावनाविरहविशिष्टतादृशनिश्चयाभावत्वेन हेतुतायां गौरवा

दूषय दित्यर्थः। तत्रैव निर्णीतव्याप्तिकमेव। भिन्नमतमुपन्यस्यति यत्विति। तां सामान्यलक्षणां तत्प्रतियोगीति। सामान्याभा

वप्रतियोगीत्यर्थः। अभावबुद्धौ प्रतियोगिज्ञानस्य हेतुतास्वत एव सकलप्रतियोगिज्ञानापेक्षास्यात्। सैव तु नास्तीत्या

ह नहीति। ज्ञानमात्रे प्रत्यक्षमात्रे। प्रथमे तं वेति। तव सामान्यलक्षणावादिनः व्यभिचारात् प्रमेयत्वसामान्यलक्षणाया

प्रत्यक्षे व्यभिचारात् द्वितीये इदं त्वेति। नन्वभावत्वप्रकारकतत्तल्लौकिकप्रत्यक्षे प्रतियोगिज्ञानं हेतुरत आह मानाभा

वेदितिश्चतत एव प्रतियोगिज्ञानं विनाप्यभावप्रत्यक्षादेव। नन्विदं भावो न वेति संशये विषयीभूतमिदं त्वं तेजोऽभावत्व रा॰म॰

मेव तथा च तत्रापि तेजोरूपप्रतियोगिज्ञानसत्वान्न व्यभिचार इत्यत आह तेजोऽभावत्वेति। तद्योगादिति। भावत्व

संशयायोगादित्यर्थः तद्धर्मविशिष्टधर्मिकतदभावग्रहं प्रति तादृशज्ञाने धर्मविरहविशिष्टज्ञानमात्रस्य साक्षाद्दोषाद्यवि
ष्टहस्य चाप्रतिबन्धकत्वादन्यथा निर्वह्निर्वह्निमानितिस्थलेव्याप्त्येवमनाहार्यधीप्रसंगादिति भावः। स्वर्थभावस्तु द्वैप्रतियो
[redacted] गिज्ञानस्याहेतुत्वे विनापि घटादिग्रहं घटो नास्तीत्याकारकाभावप्रत्यक्षापत्तिरतस्त्वाह प्रतियोगीति। तथा चोक्तबुद्धेर्घ
रक टत्वविशिष्टवैशिष्ट्यबुद्धित्वात् तत्कारणीभूतस्य घटत्वप्रकारकज्ञानस्य विरहादेव न तस्योत्पाद इति भावः। ननु स्वातन्त्र्ये
णाभावप्रत्यक्षे प्रतियोगिज्ञानस्याहेतुत्वेपि स्वाभावप्रत्यक्षे सकलप्रतियोगिविषयतासिध्यर्थं संनिकर्षविषये व
तदपेक्षास्यादत आह। सकलेति। तस्य सामान्याभावप्रत्यक्षस्य। अन्यथा भावलौकिकप्रत्यक्षे विशिष्टप्रतियोगि
ज्ञानस्याहेतुत्वे घटनिर्विकल्पकोत्तरं विशेष्ये विशेषणमिति न्यायेनाभावे घटं घटे च घटत्वमवगाह्य घटाभाव इ
त्याकारकलौकिकप्रत्यक्षं स्यात्। न चेष्टापत्तिरननुभवादपसिद्धान्ताच्च। घटत्वप्रकारेण घटविशिष्टबुद्धौ घटत्वप्रका
रेण घटज्ञानस्य हेतुत्वात् कथंचित् तन्निरासेपि घटाज्ञानदशायामिन्द्रियसंबद्धविशेषणतया नेत्याकारकस्य घटा
प्रतियोगितावच्छेदक४

17

क भावत्वेलौकिकप्रत्यक्षस्यप्रसंगोदुर्वारः अभावप्रत्यक्षंप्रतिविशिष्टप्रतियोगिज्ञानस्यहेतुत्वेतुमानुपस्थितस्यविशिष्टप्रतियोगि
नोऽभावांशेविशेषणीभूयभानेबाधकाभावात्तादृशंप्रत्यक्षं नचघटाभावस्यैवपटत्वावच्छिन्नाभाववत्वेनप्रात्यक्षिकभ्रमे
घटज्ञानाजन्यत्वेव्यभिचारात्प्रतियोगिज्ञानस्यहेतुत्वंदुर्वचं घटत्वावच्छिन्नाभाववत्वेनप्रत्यक्षंप्रत्येवघटज्ञानत्वेनहेतुत्वेतुघटा
ज्ञानदशायांविशेषणतात्प्रत्यासत्त्यानेत्याकारकप्रत्यक्षंदुर्वारमितिवाच्यं·घटत्वाद्यवच्छिन्नप्रकारतान्यप्रकारत्वानिरूपि
ये ताभावनिष्ठलौकिकविषयताकप्रत्यक्षंप्रतिविशिष्यघटत्वादिप्रकारकज्ञानत्वेनहेतुत्वात्तस्यचप्रमाभ्रमनिर्विकल्पकसा
धारणत्वात्·प्रकारत्वंतुप्रतियोगितासंबंधावच्छिन्नंग्राह्यमतोघटोनास्तीतिप्रत्यक्षस्यस्वरूपसंबंधेनाभावत्वप्रकारक बं
त्वेपितासंग्रहः·यद्यपिविशिष्टप्रतियोगिज्ञानस्यहेतुत्वपक्षेप्यभावोनघटीयइत्यभावेप्रतियोगितासंबंधावच्छिन्नघटाभा
वनिश्चयदशायामिंद्रियसंबद्धविशेषणतात्वशान्नेत्याकारकप्रत्यक्षस्यदुर्वारत्वं·नचाभावत्वसामानाधिकरण्येनयदिघटा राम०
भावग्रहः·तदातस्याविरोधित्वादत्रघटोनास्तीत्येवधीर्जायतेप्रतियोगिविशिष्टबुद्धेःसामग्रीसत्वात्अभावांशावच्छेदेनघटा

भावग्रहस्तु इदानीमसंभवी अभावत्वविशिष्टप्रतियोगितासंबंधेन घटविशिष्टबुद्धिमात्रस्यैव तदवच्छेदेन प्रतियोगिता
संबंधावच्छिन्नघटाभाववत्ताज्ञानविरोधित्वादित्युभयथापि नेत्याकारप्रत्यक्षापादनं दुर्घटमिति वाच्यं॰ तदसंभवेप्यभावत्वा
वच्छेदेन प्रतियोगितासंबंधेन घटवदवृत्तिधर्मवत्तानिर्णयदशायां विशेषणतासन्निकर्षान्नेत्याकारकप्रत्यक्षापत्तेर्वज्रलेपत्वा
त्॰ तद्वदवृत्तिधर्मवत्ताज्ञानस्यापि तद्वत्ताज्ञानविरोधित्वेनाभावांशे घटवत्ताज्ञानासंभवात्॰ तथापि नेत्याकारकप्रत्यक्षस्य घट
त्वावच्छिन्नप्रकारत्वान्यप्रकारत्वानिरूपिताभावनिष्ठविषयताकत्ववत्पटत्वकुड्यत्वादितत्तद्धर्मावच्छिन्नप्रकारत्वान्यप्रकारत्वा
तादृश निरूपिताभावनिष्ठविषयताकत्वेनैतादृशविषयताकाभावप्रत्यक्षत्वावच्छिन्नं प्रति हेतुभूतस्य तत्तद्धर्मप्रकारकज्ञानकूटस्यैक त्त
दाविरहादेव न नेत्याकारप्रत्यक्षं॰ वस्तुतो घटत्वपटत्वादिप्रत्येकधर्मावच्छिन्नाभावत्वप्रकारकप्रत्यक्षं प्रत्येव घटत्वपटत्वादिप्रत्ये
कधर्मप्रकारकज्ञानत्वेन हेतुत्वं॰ तथा च तादृशप्रत्यक्षस्य सामग्रीविरहादेव केवलेंद्रियसन्निकर्षदशायामभावो न घटीय इत्या
दिबाधदशायां वा नाभावस्य प्रत्यक्षं विशेषसामग्रीविरहादित्यत आह प्रतियोगिज्ञानं हेतुत्वेपीति॰ यत्तु॰ घटत्वाद्यवच्छिन्नप्रतियो स्य
वत्ता गितासंबंधेन घटत्वादिविशिष्टवैशिष्ट्यावगाह्यभावावच्छिन्नधर्मिताकाभाववल्लौकिकप्रत्यक्षत्वं प्रतियोगितासंबंधेन घटत्वादिवि

18

शिष्टवैशिष्ट्यावगाहित्वं स्यादिति लौकिकप्रत्यक्षत्वं इदंत्वादिप्रकारकाभावप्रत्यक्षत्वं च नातैवं इंद्रियसंबद्धविशेषणताया एव कार्य
तावच्छेदकं वाच्यं ननु प्रतियोगिज्ञानस्य तावत्त्वेन नेत्थाकारप्रत्यक्षस्य वारणासंभवात् · न चैवं घटाभावो नास्तीत्यभावत्वप्रकारकं
लौकिकप्रत्यक्षं न स्यात् तादृशाभावस्य द्रव्यतया इंद्रियसंबद्धविशेषणतायास्तद्ग्राहकत्वासंभवात् इंद्रियसंयोगादेर्द्रव्यसा
घ क्षात्कारत्वावच्छिन्नं प्रत्येव हेतुत्वादिति वाच्यं द्रव्यप्रत्यक्षत्वादेरिव घटाभावाभावत्वादिप्रकारकद्रव्यप्रत्यक्षत्वस्यापींद्रियसंयो
गजन्यतावच्छेदकत्वोपगमात् वस्तुतो नव्यमते ऽभावाभावस्यातिरिक्तत्वात् विशेषणतैव तद्ग्राहिकेति सांप्रदायिकैरुक्तं ·
घ तन्न तुच्छं · तत्तत्पुरुषीयघटत्वावच्छिन्नाभावत्वादिप्रकारकचाक्षुषत्वावच्छिन्नं प्रति तत्तत्पुरुषीयचक्षुःसंबद्धविशेषणता
त्वेनेंद्रियभेदेन पुरुषभेदेन चानंतहेतुत्वकल्पनामपेक्ष्य घटत्वावच्छिन्नाभावत्वप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति विशेषणत्वाव ये
वेन सामानाधिकरण्यप्रत्यासत्त्या घटत्वादिप्रकारकज्ञानत्वेन हेतुताया युक्तत्वात् · संयोगसंयुक्तसमवायादिभेदेनेंद्रि राम०
द यसंबंधानामननुगमाच्च · येनापि प्रसिद्धानामभावलौकिकप्रत्यक्षाणां विशिष्टवैशिष्ट्यावगाहित्वनियमात्तद्विशेषणताव

च छेदकप्रकारकज्ञानविरहादेवतेषांनावच्छिन्नेरतिरिक्तस्यैनेत्याकारप्रत्यक्षस्यालीकतयानापत्तिसंभावनापिपारमार्थिककार्यैक्य
कीनांसामग्र्याएवकार्योत्पत्तिव्याप्यत्वोपगमात्तथाचघटत्वादिविशिष्टवैशिष्ट्यावगाह्यभावप्रत्यक्षत्वादिनातद्धर्मवत्तामिंद्रि
यसंवद्धविशेषणतायाःप्रतियोगिज्ञानस्यवाकार्यतावच्छेदकत्वविरहेपिनक्षतिरिति तदसत् यत्रघटाभावेघटत्वावच्छिन्न
प्रतियोगिताकत्वादिभ्रमस्यसामग्रीनास्तितत्रेंद्रियसंवद्धविशेषणतावलेनज्ञायमानस्यपारमार्थिकस्यैवघटोनास्तीतिप्रत्यक्षस्य
घटाभावइवपटाभावेपिलौकिकविषयतासंवंधेनोत्पन्नेर्दुर्वारत्वात् · तस्यचपटाभावांशेविशिष्टबुद्धिसामग्रीविरहान्नेत्याका
रकतायास्त्वयंवशात्संपादनीयत्वादितिदिक् । तदभावेति · तस्याभावप्रत्यक्षइत्यर्थः ताद‍ृशाकारतायांसाधकाभावमुक्त्वा
व्यभिचाररूपंवाधकमप्याहध्वंसेत्यादिना घटध्वंसोहिघटतत्प्रागभावतदत्यंताभावानामभावस्तत्सत्वेघटतत्प्रागभावादयो
नसंतीतिप्रत्ययाद्व्यवहाराच्च एवंघटप्रागभावोपिघटतत्ध्वंसतदत्यंताभावानामभावस्तथाघटात्यंताभावोपिघटतत्ध्वंसत
त्प्रागभावानामभावस्तेषांचैकैकप्रतियोगिज्ञानमात्रादेवग्रहात्स्फुटतरोव्यभिचारइतिभावः । स्वमतेध्वंसप्रागभावयोर

15 च त्यंताभावेन समं न विरोधः ध्वंसस्य प्रागभावः प्रागभावस्य ध्वंसोऽतिरिक्त एवेत्यत उक्तमभ्युपगमादिति॥ प्राचामुक्तौ वादित्यर्थः इ पगामा
दमुपलक्षणं॥ नव्यमते सम नियत संख्यापरिमाणाद्यभावानामैक्यादिकमविज्ञाय परप्रतियोगिज्ञानादेव ग्राह्यत्वाच्च तत्रैव स्व
मतेपि व्यभिचारो दुष्परिहरः॥ ननु स्वपरप्रकाशकं तेजः प्रतियोगिकयावत्संसर्गाभावरूपस्यांधकारस्य ग्रहो न तादृशयावत्तेजोभ
वं विना प्रतियोगिबुद्धेरभावप्रत्यक्षहेतुत्वात्॥ यावत्तादृशतेजोग्रहश्च न सामान्यलक्षणां विनासंभवतीति प्राचां मतं दूषयति अं
धकारस्त्विति॥ तेजोविशेषेति॥ महाप्रभात्वावच्छिन्नाभाव इत्यर्थः उद्भूतानभिभूतरूपवन्महातेजःसामान्याभावस्तु नार्थः अ
नुद्भूतत्वाभावाद्यात्मकस्योद्भूतत्वादेरतीन्द्रियतया तद्घ टितधर्मावच्छिन्नाभावस्यायोग्यत्वेन प्रत्यक्षायोगात्॥ नीलत्वशुक्ल
त्वादिव्यापकमुद्भूतत्वमेकमेव सामान्यं चाक्षुषप्रयोजकं पिशाचनिदाघोष्मादौ न नीलशुक्लाद्यात्मकं रूपं किंतु तद्भिन्नमेव
प्रत्यक्षस्य चाक्षुषाद्यन्यतमत्वनियमश्च रूपस्य नीलशुक्लाद्यन्यतमत्वनियमे मानाभाव इत्यस्मद्गुरुचरणानां मते तु सा रामं०
रेण तदु क प्रकारोपि सम्यगिति ध्येयं न चालोकसन्निधानेपि घटीयरूपेण महत्त्विचाक्षुषापत्तिः चक्षुःसंयुक्तसमवेतरूप

पि विशेषणतायाः तादृशप्रमाद्यभावेऽसत्त्वादिति वाच्यं। तमः साक्षात्कारं प्रति चक्षुः संयुक्तविशेषणतया एव हेतुत्वोप
गमादिति भावः। एकत्रेति। एकदेशीयतेजोध्वंसप्रागभावव्यक्तीनामन्यदेशे विरहादिति भावः। ननु यावत्त्वं प्रतियोगि वि
शेषणं तथा च यावंति तादृशतेजांसि तन्मध्ये किंचित्त्वेतरधर्मानवच्छिन्नतत्त्वनिष्ठप्रतियोगिताकाभावानामेकदेशवृत्तीना तद्या
मेकत्वमस्त्वित्याशंक्य मतमाह अननुगमादिति। निरुक्ताभावानामनुगतैकधर्माभावात्तमः इत्यनुगताकारप्रतीतिर्न स्यादिति
भावः। ननु यावंति तादृशतेजांसि तेषां तथाविधैकप्रतियोगिकाभावविशिष्टेनापरप्रतियोगिकाभावेन विशिष्टमन्यप्रति
योगिकामर्वमादाय तेन तेनापि विशिष्टमपरापरप्रतियोगिकाभावत्वेमनानुगमकं वाच्यमत आह गौरवादिति। अनंतानाम
भावानां तमः प्रतीतिविषयत्वकल्पनापेक्षया तेजोविशेषसामान्याभावस्यैव तादृशप्रतीतिविषयतायां लाघवादिति भावः।
ननु तेजोविशेषसामान्याभावस्य सन्निकर्षदशायां तत्तत्तेजोऽभावस्यापि सन्निकृष्टतया तेषामपि तमः प्रतीतिविषयताप्रो
माप्तेः कुतो गौरवमत आह तेजोविशेषेति। तेजोविशेषत्वादिज्ञानविरहे तेजोविशेषात्यंताभावस्य प्रत्यक्षानभ्युपगमादिति पि

२० श्री

जनात्तथाचविशिष्टप्रतियोग्यनुपस्थितौतेजस्त्वादिसामान्यलक्षणांगीकारेपिनाभावसमुदायस्यप्रत्यक्षसंभवइतिवाच्यं
तत्प्रत्यासत्तेरितिभावः।तेजःसामा[illegible]इति।तथाचप्रागभावस्यप्रतियोगिसामग्रीवंध्यत्वात्तेजःसामग्रीविरहदशायामंधका
रप्रतीतिर्नस्यादितिभावः।ननुभाविप्रतियोगिकप्रागभावप्रत्यक्षस्यतादृशप्रतियोगिव्यक्तिज्ञानंविनानुत्पादात्तदर्थंसामान्य
लक्षणावश्यकीत्यतआह।प्रागभावेति।तथाचघटप्रागभावइतिप्रत्यक्षस्यविशिष्टवैशिष्ट्यबोधतयाघटत्वप्रकारकज्ञानमा
त्रंतत्रहेतुर्नतुप्रतियोगिव्यक्तीनांतत्रप्रवेशइतिभावः।ननुघटादिप्रतियोगिविशेषितप्रागभावप्रत्यक्षेघटादेर्भानावश्यंभव
श्यंतस्यसंनिकर्षोवाच्यः।सचलौकिकप्रत्यासत्ति बाधाद्गत्यैवसामान्यलक्षणापर्यवस्येदित्याशंकतेन्यथेति।इतिप्र
त्यक्षमित्याकारशब्दप्रयोजकप्रत्यक्षंघटीयप्रागभावोवर्त्तमानइत्याकारप्रत्यक्षमितियावत्।यथाश्रुतेघटस्यविशेष्य
तयैवस्वरूपाविर्भानात्प्रतियोगिविशेषितमित्यादसंगत्यापत्तेः।भ्रमत्वमिति।प्रसज्येतेतिशेषः।प्रतियोगितासंबंधेनतत्तद्व्य राम०
भाववतिघटत्वादिप्रकारेणापितादृशसंबंधेनतत्तद्व्यावगाहिनोज्ञानस्यभ्रमत्वाभ्युपगमादितिभावः।स्मृतमिति।य

ज्ञानलक्षणासंपादकत्वेन४

घपिघटत्वप्रकारकस्यानुभवस्यैवप्रत्यासत्तित्वात्तु तत्त्वं घटो भविष्यतीतिप्रत्यक्षमेव भाविघटं विषयीकृत्योत्पत्तुमर्हति
तथाप्युक्तप्रत्यक्षे प्रागभावांशे भाविघटस्य विशेषणतया तस्य ज्ञानं पूर्वमपेक्षितमित्याशयेन स्मृतमित्युक्तं· तत्रापि स्मृ
तत्वं न विवक्षितं किंतु ज्ञानमात्रं तेन घटत्वसामान्यलक्षणाजन्यानुभवादपि घटविशेषितप्रागभावप्रत्यक्षस्य क्वचित्सं
भवान्नन्यूनत्वं। सामान्यलक्षणाप्रत्यासत्तेः स्वाश्रयमुख्यविशेष्यकप्रत्यक्षं प्रत्येव जनकत्वात्· तादृशप्रत्यासत्त्या प्रागभा
या वविशेषणतया घटस्य प्रत्यक्षं न संभवत्यत उक्तं स्मृतमित्यपि हुः॥ तं भाविघटं तत्घटो भविष्यतीति प्रत्यक्षं· तच्छब्दस्य प्र
तियोगिविशेषितमित्यस्य प्रतियोगिविशेष्यकमित्यर्थः तच्च प्रत्यक्षविशेषणं तेन घटो वर्त्तमानप्रागभावप्रतियोगी
व त्याकारस्यैव प्रत्यक्षस्य लाभः· घटत्वेनानुभूतं स्मृतं चेत्यत्र चकारो वार्थः तेन क्वचित्सामान्यप्रत्यासत्त्या घटत्वे नानुभूतं पि
च कचिद् ताद्दृशानुभवत्वलाघटत्वेन स्मृतमेव भाविघटं घटो भविष्यतीति मानसप्रत्यक्षं सामान्यप्रत्यासत्तिवलादेवेत लं
त्यर्थः तेन घटीयो वर्त्तमान प्रागभाव इति प्रत्यक्षस्य भाविघटप्रागभाव एव घटत्वप्रकारेण प्रतियोगितया घटांतराव

गाहित्वेपि नञ्समस्तं प्रतियोगितासंबंधेन घटत्वावच्छिन्नाभाववत्त्वेवतादृशासंबंधेन घटत्वावच्छिन्नप्रकारत्वकज्ञानस्यतादृश
स्य संबंधेन घटत्वावच्छिन्नं भ्रमत्वादित्युक्तावपि न क्षतिरिति प्राहुः॥ नचेति द्वितीयवाक्यमित्यनेनान्वयः। कारणांतरप्रवेशेगौ
२१ रवादाह चमत्कारं करोति। प्रतियोगिनइत्यादि। अन्यदा चरमकारणासत्वदशायां तस्याः सामग्र्याः तथात्वे प्रागभावध्वंसकत्वे
ऽतिप्रसंगादिति। सामग्र्यां प्रागभावव्यभिचारस्य ग्रहदशायामपि तत्प्रत्यक्षप्रसंगादित्यर्थः। तथात्वं प्रागभावध्वंसकत्वं तद्धे
तुका सामग्री हेतुका। नच सामग्र्याः प्रागभावव्याप्यत्वग्रहेपि पक्षधर्मताज्ञानस्याभावात्कथमनुमितिरिति वाच्यं। घटप्रा
गभावव्याप्यघटसामग्र्याः कपालवृत्तित्वसंदेहेपि प्रागभावप्रत्यक्षस्यानुत्पादेः तदनुरोधेनापि पक्षधर्मताज्ञानस्य
स्यावश्यं वाच्यत्वादिति भावः। अनुमितिरेवेति। तथा च तस्यां पूर्वं प्रतीतस्यापि घटादेः पक्षधर्मतावत्त्वादेव भानमविरु
द्धं अनुमितौ व्यापकतावच्छेदकप्रकारेणाज्ञातस्यैव तंत्रत्वादिति भावः। ननु कपालादौ प्रागभावव्याप्यसामग्र्याः परामृ राम०
ष्टेपि घटप्रागभावस्य नानुमितिः समानविषये लौकिकप्रत्यक्षसामग्र्या बलवत्त्वादत आह तावत्कालमिति। सामग्र्यां

नञ्प्रत्यक्षे ४

प्रागभावव्याप्त्यादिग्रहकालपर्यंतमित्यर्थः अस्तत्वेनेति नव्यपक्षेँ चरमकारणोत्पत्तिक्षणोत्तरपूर्वक्षणे वा प्रागभावव्या व
प्यतया चरमसामग्र्याः परामर्शस्तत्रोत्तरकालं प्रागभावप्रत्यक्षे बाधकाभावः पूर्वं प्रागभावात्मकविषयस्यसत्त्वादिति
वाच्यं प्रागभावव्याप्यचरमकारणवत्तायाः स्मृत्यादिसाधारणनिर्णयमात्रस्यातिप्रसक्तत्वात् तल्लौकिकनिर्णयस्ये
वहेतुतया पूर्वं तदसंभवादिति भावः। तदुद्देश्ये वेत्येवकारेण व्याप्यत्वादिधीव्युदासः। तथा च कार्योपधायकत्वेन चरमका
रणवत्ता लौकिकप्रत्यक्षमेव प्रागभावस्य व्यंजकमतः स्वरूपतस्तदनुभवे कार्योपधायकतया तद्वैतस्मरणे वा न प्रागभा
वप्रत्यक्षं तदभिप्रेत्यैवोक्तं कार्योत्पादो दृष्ट इति। केचित्तु यादृशस्य प्रागभावप्रत्यक्षकारणकलापस्यानंतरं कार्यीभूत
स्य प्रागभावप्रत्यक्षस्योत्पादो दृष्टः प्रमाणसिद्धः तदुद्देश्ये वतादृशकारणकलापांतर्गतैर्द्विव्यक्तेरेव प्रागभावव्यंजक बु
त्वोपगमादित्यर्थः तथा च प्रागभावव्याप्यत्वाद्यविषयकस्यापि चरमकारणविषयकतज्ज्ञानस्यैव विशिष्य प्रागभावप्रत्य
प्य क्षहेतुत्वोपगमान्नतस्यानुमितिरिति भावः। तेन स्वरूपतो ज्ञानादिकमादाय नातिप्रसंग इत्येशोपीत्याहुः। ननु प्रागभाव

२२

व्याप्यचरमसामग्रीमत्वज्ञानमेव प्रागभावग्रहे हेतुः परामर्शस्यानुमितिहेतुतायाः क्लृप्तत्वात् न तु कार्योपधायकतया सा
मग्रीमत्वज्ञानं तथाकारस्यांतरकल्पनागौरवात् · एवं चान्यत्र समानविषये प्रत्यक्षसामग्र्या बलवत्वेप्यत्र तदकल्पनात् ·
प्रागभावस्यानुमितिरेव जायता मतः प्रत्यक्षासत्वेऽनुमानमपि प्रागभावस्य दुर्घटमित्याह अनुयोगितेति · अनुयोगितं घ
टादिनिष्ठप्रतियोगिता निरूपितस्वरूपसंबंधविशेषः आदिपदादवखंडोपाधिरूपस्य प्रागभावत्वस्य परिग्रहः प्रागभावत्वा
देरित्यादिपदादन्यदीयव्याप्याद्युपग्रहः तद्रूप्येण प्रागभावत्वरूपेण असंभवादिति · तथा चानायत्यैव तत्प्रत्यक्षमास्थेयमि
तिभावः घटो भविष्यतीति शब्दाभिलप्यमानोऽर्थ एव यदि भविष्यत्वं तदा तस्यातींद्रियत्वे न प्रत्यक्षमेव नास्तीत्युक्तं तत्
या त्र प्रतियोगिविषयिताऽरक्षायै सामान्यलक्षणांगीकार्येत्याशयेनाह भविष्यत्वं हीति · भविष्यतीति पदाभिलप्यमानं
हीत्यर्थः गुरवस्तु। ननु घटो भविष्यतीति शब्देनाभिलप्यमानो योऽर्थस्तज्ज्ञानमेव प्रागभावप्रत्यक्षं किं वा कार्योऽनुप्या राम०
हृदयाशयमिह कपाले घटो नास्तीत्याकारकं इहेदानीं घटप्रागभाव इत्याकारकं वा नाद्य इत्याह भविष्यत्वं हीति · द्वितीयादि

वितर्कितस्यपश्चाद्भूष्यत्वादितिभावः। नष्टादावपिभविष्यतीतिप्रयोगापत्तेरुक्तंवर्त्तमानेति· प्रागभावविशेषणं: तच्चतत्प्र
तियोगिधिकरणकालीनत्वंध्वंसाभाविनीति· ध्वंसाभाविघटीयप्रागभावस्याद्यापिवर्त्तमानत्वात्· नचाद्यादिकालस्यप्रतियोगित्वे
वान्वयः तथासत्यद्यभाविनिपरश्वोभविष्यतीतिप्रसंगात् ह्यद्यभाविनःपरश्वोपिवृत्तेः नापिप्रागभावप्रतियोगिनिचोभयत्र
कालादेरन्वयान्नैवमितियुक्तं अद्यक्षणेघटोभविष्यतीतिप्रयोगानुपपत्तेः घटतत्प्रागभावयोरेकक्षणावृत्तित्वादितिभा
वः।उत्पत्तिरेवयत्पंभविष्यत्वघटिकेऽत्रहेतुःसमानार्थकत्वादित्यंतांस्वयंप्रागभावास्वीकारादाहवर्त्तमानकालेति· अत्रो
३ त्पत्तिरपिध्वंसघटितात्यात्या· इदंनिरुक्तभविष्यत्वं· अतीन्द्रियत्वादिति· तथाचानुमानादिनैवतद्ग्रहणंवाच्यमित्यनागतभा द्रू
नार्थेनसामान्यप्रत्यासत्त्यादरः यद्यपिभविष्यत्वस्यातीन्द्रियत्वेपिभाविघटविशेषिततद्लौकिकप्रत्यक्षानुरोधेनैवसा
मान्यप्रत्यासंत्तिरावश्यकीतस्यप्राचीनघटावगाहित्वेनुभ्रमत्वापत्तेस्तथापिवक्ष्यमाणक्रमेणाशब्दादनुमानाद्वाघटत्वादि
प्रकारेणभाविनोघटादेर्ज्ञानोत्पत्त्याविनापिसामान्यलक्षणांभव्यविघटादेर्भविष्यत्वभानंभविष्यतीतिसिद्धांतनिगर्वः।नन्व

२३ ऽपि भविष्यत्वे कालादेस्तदु[illegible]स्कप्रागभावान्वयित्वे पूर्वोक्तातिप्रसंगतादवस्थ्यमत आह इहेतीत्यादौ प्रयोगे तादृशोऽसत्वेः
विद्यमानप्रागभावप्रतियोग्युत्पत्तेः देशविशेषः कपालादिः कालविशेषोऽस्य घटस्यादिः अधिकरणत्वेनेति प्राचां मते तेषां भेदा .ते
र्थैकविभक्तिसमवधानस्थले नामार्थधात्वर्थयोरपि भेदेनान्वयस्यापगमात् अधिकरणत्वविशेषणत्वेनेति वार्थः तथा चे
घ इहौ घटो भविष्यतीत्यादौ वर्त्तमानप्रागभावप्रतियोगिनी या एतत्कपालवृत्तिर्घटादिकालवृत्तिरुत्पत्तिस्तदाश्रयो घट इत्याका
रः शाब्दबोधः उत्पत्तिमतो वेति अधिकरणत्वेन प्रतीयत इत्यनुषंजनीयं कालस्य प्रागभावान्वये ऽसो भाविन्यद्य भविष्यतीति ल
प्रयोगप्रसंगस्य पूर्वमुक्तत्वात् देशस्य प्रागभावान्वये दोषमाह अत एवेति यतो न प्रागभावे देशकालयोरन्वयः अत एवेत्य
र्थः घटादौ इत्यादिना तत्प्रागभावसंग्रहः तत्रापि घटध्वंसप्रागभावत्वस्य प्राचीनैः स्वीकारात् तत्प्रागभावेति घटनाशप्राग
भावेत्यर्थः तत्र स्वनाशनाश्यघटके कपालेनेत्यस्य बुद्धिरित्यनेन संबंधः नच घटध्वंसस्य प्रागभावो न घटादिः किंत्वतिरिक्त राम०
एव स च तादृशकपाले नास्तीति नोक्तदोष इति वाच्यं प्राचां मते नोक्तत्वात् नव्यमते पि देशविशेषस्योत्पत्तिविशेषणतयैवान्व

यस्यानुभविकत्वादितिभावः उत्पत्तिमतिदेशकालयोरधिकरणत्वेनान्वये दोषमाह नवेति · नचोत्पत्तिमति प्रागभावे चोभय
त्रैवदेशकालयोरन्वयावकाश इति मैत्र प्रागभावस्य परश्वः प्रागरणयोरसत्त्वान्न दोष इति वाच्यं · श्वो घस्करो घटो भविष्यतीति प्र
योगानुपपत्तेः घटतत्प्रागभावयोरेकक्षणावृत्तित्वादित्युक्तत्वादिति भावः। परश्वः प्रागरणागच्छति गते वा मैत्रे तदीयोत्पत्ते वि
द्यमानप्रागभावप्रतियोगित्वमेवासंभवीत्यत उक्तं गमिष्यतीति · ननु भूधातुस्यातिप्रत्ययाभ्यामुत्पत्तिद्वयोपस्थापनाद्धटो
भविष्यतीत्यादौ विद्यमानप्रागभावप्रतियोग्युत्पत्तिकोत्पत्तिमानित्यन्वयबोधे नुभवविरोध इत्यत आह अत्र चेति गगनं भवि
भवतीत्यादौ व्यापारात्मकविशेषणासंबंधस्यानुभवात् द्रव्यादित्वादात्मामेव भुवः शक्यं समभिव्याहृतद्रव्यादिपदस्य तन्नदर्थे
तात्पर्यग्राहकत्वात् · तादात्म्यमात्रस्य भूशक्यत्वेनामार्थस्य द्रव्यदे धात्वर्थस्याप्येतत्क्रमेदान्वयानुपपत्तेः स्वस्तुवाऽस्तित्वल
क्षणांस्वरूपसत्त्वमेव भुवः शक्यं नतूत्पत्तिर्गौरवादित्याशयेनोच्यते इत्यपहाय प्रत्याप्यत इत्येवोक्तं प्रतीतिस्तु लक्षणयापि सं
भवतीतिभावः। तादृशेति · विद्यमानप्रागभावप्रतियोगित्वमित्यर्थः स्वयं प्रागभावास्वीकारादाह तादृशेति · वर्त्तमानकालोत्तर

२५

कालीनत्वं चेत्यर्थः प्रत्याप्यतइत्यनुषज्यते । अग्रे च वस्तु । भूसत्तायामित्यादि [redacted] शाब्दिकसमृतेरिहाद्य घटो भविष्यतीत्यादौ धातोः काल
संबंधरूपं स्वरूपसत्तामात्रमर्थः तदुत्तरप्रत्ययस्य वर्त्तमानप्रागभावप्रतियोगित्वं कालादिबोधकाद्यादिपदस्थसमभ्याहृतूपातिर
र्थः शरदि पुष्प्यन्तिसप्तच्छदा इत्यादौ सप्तम्यास्तदर्थकालस्यभ्युत्पादनादेवं च एतद्देशोत्पत्तिकैतत्कालोत्पत्तिकाचयाविद्यमा
नप्रागभावप्रतियोगिनी स्वरूपसत्तातदाश्रयोघटइत्यन्वयाकार इत्याहुः ॥ तन्नु इहाद्य घटो भविष्यतीत्यन्वयबोधस्य सकृदेवो दाव
त्पत्ति विषयकत्वानुभवात् स्वरूपसत्तानानुभवाच्च दीधितिकृतोपेक्षितमिति समर्त्तेवं । ननु वर्त्तमानप्रागभावप्रतियोगितामा
त्रस्यैव प्रत्ययार्थत्वे स्यसंहितत्यादेर्भविष्यत्तायामनुशासनविरोधः स्यादतो न शादिक्षात्त्वरस्यैवस्याविप्रभ [redacted] तेर्भविष्यत्ताबो
धकत्वमुपपादयन्ति नंष्यतीति ननु धात्वर्थप्रत्ययस्योत्पत्त्यर्थकत्वं न कुत्रापि दृष्टचरमतः स दृष्टांतमाह न श्पतिनष्टइत्या
दौ चेति । स्वारव्यातकृद्वेदेत्यदृष्टांतद्वयोपन्यासः । यथापर्यं यथाक्रमं उत्पत्तिरिति । प्रत्याप्यत इत्यनुषज्यते अत्र च वर्त्तमानत्वादौ राम०
क्रमशक्तिकानां प्रत्ययानां मुत्पत्तौ लक्षणा शक्यलक्ष्ययोस्तु परस्परमन्वयाद्विधाप्रत्ता भइत्यवधातव्यं । यद्यपि कारकविभक्त्य

थैस्यवात्वर्थान्वयित्वानुरोधेन धातुनैवोत्पत्तिर्नाशश्च प्रत्याप्यत इत्येवं वक्तुमुचितं तथापि प्रत्ययं विना कृता केवलं न शब्धातो
रुत्पत्तिविशिष्टनाशस्याप्रतीतेः प्रत्ययसत्त्वे च प्रतीतेरन्वयव्यतिरेकाभ्यां प्रत्ययस्यैवोत्पत्तिरर्थः स्वभाववैचित्र्याच्च प्रत्ययार्थे
नापि कृत्तिकारकसम्पर्थस्यान्वय इत्याशयः एवं च नंक्ष्यतीत्यस्य वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिको यो नाशो त्प्रतियोगिता स्त
वानित्यर्थः नष्टपतीत्यस्य वर्त्तमानोत्पत्तिको यो नाशस्तत्प्रतियोगितावानित्यर्थः नष्ट इत्यादौ च वर्त्तमानध्वंसप्रतियोग्युत्पत्तिको यो को
नाशस्तत्प्रतियोगितावानित्यर्थ इति ध्येयं । तस्यामेवेति प्रत्ययोपस्थाप्योत्पत्तावेव न तु प्रकृत्यर्थनाश इत्यर्थः । ननु भविष्य
त्वादौ यत्प्रतिप्रसक्तेरनुशासनं तत्र विद्यमानप्रागभावप्रतियोगित्वादि यत्नेनासक्तं भविष्यत्वादिपदं व्याख्यातस्योत्प
त्यर्थकत्वं व्यर्थमतस्त्वाह एतेनेति एतेन उत्पत्तावेव कालविशेषादेरन्वयेन इदं च परास्तमित्यन्वयि: नंक्ष्यतीति व्यव
हारः स्यादिति योजना । ध्वंसाभाविनाशस्य परश्वोपि सत्त्वादिति भावः नष्टे चेति त्पन्ननाशस्य विद्यमानत्वादिति भावः तस्या चि
श्चेति: नष्टे चेदनुपपद्यते इत्यादिरिति व्यवहार इत्यनुपपद्यते आदिपदेन नष्टवानित्यादिसंग्रहः । क्तप्रत्ययार्थोऽतीतत्वस्य न
वर्तमानत्वादे ३

धास्संभवादिति भावः तत्र नष्ट इत्यादौ अतीतेति तथाच नाशस्य विद्यमानत्वेपि अतीतकालसंबंधित्वान्नष्ट इत्यादिव्यव
हारो नानुपपन्न इति भावः लाघवादाह वर्त्तमानत्वं वेति प्रथमे चिरविनष्टेपि पूर्वेद्युर्नष्ट इति स्यात् चिरोत्पन्ननाशमते
रतीतकालसंबंधित्वपूर्वदिनवृत्तित्वयोः सत्वात् द्वितीये तु चिरविनष्टेप्यधुना नष्ट इति स्यात् तादृशनाशस्य वर्त्तमानत्वा
क्ष्य दधुनासत्वाच्चेत्याह चिरविनष्टेपीत्यादिना नतु घटो भविष्यतीति नैतीत्यादौ धात्वर्थोत्पत्तिनाशादेः कथं घटादावन्वयः व
धात्वर्थेनामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादत आह कर्त्तरीति भविष्यतीत्यादावाश्रयत्वरूपं नंक्ष्यतीत्यादौ च प्रतियो
गित्वरूपं कर्तृत्वमाख्यातेन प्रत्याय्यते भविष्यन्ति तत्राश्रयरूपो नष्ट इत्यत्र च प्रतियोगिरूपः कर्त्ता कृता कथ्यते तथा
च प्रकृते धात्वर्थनामार्थयोर्भेदान्वयबोधस्य एवेति भावः। कृतिस्वरूपकर्तृत्वे कृद्॥ ख्या ख्यातस्य मनभिधानाद्दूरादि स्याख्यात
पदे तत्र मनभिहिताधिकारीयतृतीयाप्राप्त्यादित्याशंकाव्युदासाय कर्तृत्वं कर्त्ता चेति द्वयैरुपन्यासः तेन मुख्यभाक्तक रामः
र्तृत्वमात्रानभिधानस्थल एव तृतीयेति भावः॥ ननु घटानुत्पाददशायामिह कपाले घटो नास्तीति प्रतियोगिविशेषित

समयावच्छेदेनेति कालिकाव्याप्यवृत्तित्वसूचनाय १

प्रागभावप्रत्यक्षानुरोधादेव सामान्यलक्षणा वाच्येत्यत आह कार्यो नुत्पादेति । अयं घटो नास्तीत्याकारप्रत्ययः तादृशेति । घ
टो नास्तीत्याकारे त्वर्थेः घटांतरप्रतियोगिकध्वंसप्रागभावयोस्तत्रसत्वादिति भावः । यद्यपि घटप्रतियोगिकाभावमात्रावगा
हनेऽपि न सामान्यलक्षणासिद्धिः पूर्वावगतघटव्यक्तीनां ज्ञानादेव तादृशबुद्धिसंभवात् तथापि वस्तुगतिमनुरुध्येदं । प्रति
योगितावच्छेदकमिति । अभावमवगाह्य तद्द्वयमनुषंजनीयं । तयोरिति । घटत्वावच्छिन्नप्रतियोगिताकावित्यर्थः । ध्वंसप्रा
गभावयोः सामान्याभावत्वस्वीकारेपि तत्र कपाले तत्संभवदृत्याह संभवतो वेति । इदमपि वस्तुगतिमनुरुध्य अन्य
स्य या घटत्वावच्छिन्नध्वंसादेः सत्वेपि तत्स्य घटत्वेन यत्किंचिद्व्यक्तिज्ञानादेव संभवेत्तदनुरोधात् सामान्यप्रत्यासत्तेरसि न
द्धिरिति ध्येयं ।। ततः पूर्वमिति । घटो नास्तीति प्रतीतेः पूर्वं । तत्र कपालेत्यनुषज्यते न च भाविनष्टयोरत्यंताभावस्यैव ध्वं नचे
सादेरपि सामान्यावच्छिन्नप्रतियोगिताकत्वे बाधकाभावः । कस्यचिद्घटस्य नाशदशायामेव भाविघटो नष्टः कस्यचिद्घट
स्योत्पत्तिदशायां च प्रनष्टघटो भविष्यतीति प्रत्ययापत्तेरेव बाधकत्वादिति भावः । ननु परात्यंताभावस्य पटध्वंसाद्यविरोधि

त्वेपटध्वंसात्यंताभावस्वरूपस्य चापरात्यंताभावस्य पटध्वंसदशायामपि तंतौसत्त्वात्तदानीमपि तत्र पटध्वंसो नास्तीति प्रती
तिः स्यादन्यथा तदानीं तंतौ पटो नास्तीत्यपि प्रतीतिर्न स्यादित्यकामेनापि ध्वंसात्यंताभावयोर्विशेषो वाच्य इत्याशयेनाशंक
२६ ते अत्रैवमिति· एवं पटसमवायिन्यपि तदत्यंताभावसत्त्वे कपालादाविति सावधारणं तथा च तंतावपि पटध्वंसदशायां तादृ
शप्रतीतिः स्यादिति भावः। अत्रैव हेतुरत्यंताभावस्येत्यादि त्वन्मत इत्यादिः। तत्तदिति· कपालाद्यात्मके त्यर्थः स्वरूपाणाम
ननुगमादभावत्वप्रतीतिर्भ्रमत्वापातात्तत्त्वं तु स्वरूपाणामतथात्वे पटसमवायित्वदशायां तत्र पटध्वंसस्यत्यताप्रतीत्यप
त्तापापत्तेर्सर्वैह अतिरिक्तेति· स च पटसत्त्वदशायां तंतावप्यस्तीति भावः। नन्विहेदानीं घटप्रागभाव इति प्रत्यक्षे भाविनो
घटस्याभावार्थसन्निकर्षसंपादकतया सामान्यप्रत्यासत्तिरावश्यकी त्वत आह इहेति· न लोकानामिति· तथा च किमनुरो
धात्सामान्यलक्षणांगीकार्येति भावः। एवमिति· भविष्यतिनास्तीत्यादिप्रत्ययानामन्यविषयकत्वे प्रागभावत्वेन प्रतीतेश्चा राम०
नुपगम इत्यर्थः प्रागभाववध्वंसस्याप्यसत्त्वे तदु[illegible]टितस्य पूर्वत्वादेः पश्चान्नित्रे चेत्यत्राघटध्वंस इत्याकारकबुद्धेरुत्पत्तं
नमसंगतेस्यात्तदतो ध्वंसे प्रमा~~सर्र्क~~णोपन्यासपूर्वकं प्रागभावमपाकरोति जात इत्यादिना· १ (यर)

मिति शेउपनीतभानतयानवस्तुव्यवच्छेदकत्वेयदिब्रूयात्तदाघटादेरप्युत्पत्तिर्नस्यात्तुल्यत्वादित्यावेदयितुं जातो घट इ
तंयतं स्यादतो ध्वंसे प्रामाणोपन्यासपूर्वकं प्रागभावमपाकरोति जात इत्यादिना अतिरिच्यतामिति· अत्यंताभावादेरा
दिः नत्विति· प्रागभावशब्दोपिप्राक्कालवृत्त्यभावबोधकतया वाक्यमेवनतुपदमितिभावः। ननुप्रागभावकालवृत्तित्वरूपं
च सामान्यतः पूर्वत्वं तत्प्रागभाव कालवृत्तित्वरूपं तत्पूर्वत्वं विना प्रागभावं दुर्वचमत आह· पूर्वत्वेति· तत्पूर्वत्वादीत्यादिपदेन
तदव्यवहितपूर्वत्वसंग्रहः· तच्चतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिकालवृत्तित्वं· सामान्यतः पूर्वत्वमतीतकालवृत्तित्वं
तच्चध्वंसप्रतियोगिकालवृत्तित्वं महाप्रलयवारणाय प्रतियोग्यंतस्यावश्यकत्वादिति· तदुत्पत्तीत्यादि स्वस्यापि स्वाद्विती भावः
द्वि यक्षणादिवृत्तिध्वंसप्रतियोगिनि प्रथमादिक्षणे वृत्तेः स्वस्यैवस्वपूर्वत्वापत्तेरत उक्तं उत्पत्तीति· अत्र च उत्पत्तिस्तदधिकरण
स समयध्वंसानधिकरणसमयमात्रं ननु तत्संबंधेपि निवेश्यो वैयर्थ्यात् स्वोत्पत्तिकालीनात्यंताभावप्रतियोगिस्वाद्विती
र्व यक्षणादिवृत्तित्वमपि सत्स्यापत्तीति पूर्वदोषतादवस्थ्यमतो ध्वंसेत्युक्तं· नष्टघटादिगोचरज्ञानादिव्यक्तीनां स्वोत्पत्ति

27

प्रायश्चित्तमनुपयुक्तं स्यात्

क्षणाद्यवृत्तिध्वंसप्रतियोगिनि घटादौ विषयतया वर्त्तमानत्वेन स्वपूर्ववृत्त्यापत्तिरतः कालेति · कालिकसंबंधेन वृत्तिप्रापकं न
नु दुःखप्रागभावस्योत्तरकालानुवृत्तिमुद्दिश्य प्रायश्चित्तादौ प्रवृत्त्यन्यथानुपपत्त्यैव प्रागभावः सिद्ध्यतीत्यत आह दुःखात्यं स्य
ताभावस्येति · अत्यंताभावस्य स्वत एवोत्तरकालानुवृत्तेः संभवतीत्यत उक्तं स्वस्मिन्निति · ननूत्तरकालसंबंधात्मि
कायां तदनुवृत्तौ प्रायश्चित्तं न हेतुः तस्याः कृत्स्नकारणाधीनत्वात् · दुःखात्यंताभावस्य तु नित्यत्वात्तत्र प्रायश्चित्तस्य
हेतुत्वं संभवतीत्यत आह दुःखसाधनेति · तथा च दुःखसाधनीभूतपापनाशकत्वेनैव प्रायश्चित्तं हेतुः तस्य च दुःखाभावस्य त्यंता
खतत्साधनान्यतोपि दृष्टाभावत्वेनैवेष्टत्वमिति स्वयमेव बौद्धाधिकारटिप्पण्यां व्यवस्थापितमिति भावः ननु तु यद्यपि इ
यं प्रवृत्तिः सफला प्रेक्षावत्प्रवृत्तित्वादित्यनुमानस्य दुःखसाधनध्वंसादिफलकतया न तथा सिद्धिः तथापि इयं प्रवृत्तिः
प्रागभावफला प्रागभावोद्देश्यकप्रवृत्तित्वादित्यनुमानात्फलत्वेन प्रागभावः सिद्ध्येदित्यत आह प्रमाणांतरेति · तथा राम०
च प्रागभावे प्रमाणांतराभावात्साध्यसाधनयोरप्रसिद्ध्या न तादृशानुमितिरिति भावः न चेति प्रवृत्तेः प्रयोजनज्ञानाधीन

तथा तदन्यथानुपपत्त्या प्रयोजनकल्पने ऽन्योन्याश्रयप्रसंगादिति भावः। ननु प्रागभावासत्त्वे जातस्यापि घटस्य द्वि
तीयक्षणे पुनरुत्पादप्रसंगः कपालसंयोगाद्यात्मकसामग्र्यास्तदानीमपि सत्त्वात्. न चापाद्यस्य पुनरुत्पादस्याप्र
सिद्धिः एतद्घटद्वितीयक्षणोयद्येतद्घटसामग्रीक्षणः स्यादेतद्घटोत्पत्तिप्राक्क्षणः स्यादित्यापादनसंभवात्. न चात्र
सामग्रीपदेन दंडचक्रादिमात्राभिधाने सर्वैव घटद्वितीयक्षणस्य तद्घटोपगमात् विपर्ययापर्यवसायित्वं प्रागभावा
दिघटितकारणकूटस्याभिधाने चापादकाप्रसिद्धिरिति वाच्यं. स्वकारणीभूतदंडचक्रादिविशिष्टोयं घटो यदि दंडचक्रा
द्यतिरिक्तकारणको न स्यात् जन्यत्वे सति तद्घटोत्पत्त्युत्तरोत्पत्त्यभाववान् स्यात् दंडचक्रादिजन्यस्य तत्सत्त्वे जननं
नियमादित्यस्य विवक्षितत्वात्. वस्तुतो घटोत्पत्तिक्षणोप्यदितद्घट जनकतावच्छेदकधर्मावच्छिन्नाभाववान् स्या
त्तदा तद्घटोत्पत्तिप्राक्क्षणः स्यादित्येवापादनीयमतो न कश्चिद्दोषः एतदाह उत्पन्नेति. तथा च जन्यद्रव्यादिसामान्यं
प्रत्येव द्रव्यादिसामान्याभावत्वेन हेतुत्वात् उत्पन्नस्य घटादेर्द्वितीयक्षणे पुनर्नोत्पादः न चैवमेकतंतुसंयोगनाशा

२८

न्महापटनाशोत्तरमवस्थितेभ्यस्तंतुसंयोगेभ्य एव च पटांतरोत्पाददशायां पुनर्महापटोत्पत्तिकारणं यथा प्रागभावस्य हेतुत्वमा

वश्यकं ॰ द्रव्यसामान्याभावस्याप्रसंगात् ॰ कार्योत्पत्तिक्षणे कार्येणाप्रतिबंधासंभवादिति वाच्यं ॰ तत्र विनष्टतंतुसंयोगव्य

क्तेर्महापटं प्रति विशिष्यहेतुत्वात्तदभावादेव तदानीं महापटोत्पत्त्यसंभवात् ॰ अतिरिक्तस्य प्रागभावधर्मिणः कल्पना

मपेक्ष्य लाघवात् तासां तंतुसंयोगव्यक्तेरेव विशिष्य महापटं प्रति हेतुतायाः कल्पनार्हत्वात् ॰ न च तं तुसंयोगव्यक्तेरिव तदन्य त

निय मवैतंतसंयोगांतराणामपि विविगमनाविरहाद्विशिष्यहेतुत्वापत्तिः । तेषामन्यथासिद्धत्वस्य सर्वसंमतत्वात् ॰ न चैवमपि

त्ते महापटोत्पत्तिदशायामेव उक्तस्थले भाविखंडपटोत्पत्तिः स्यात् ॰ कार्यस्य पूर्वमसत्त्वेन प्रतिबंधायोगादिति वाच्यं ॰ महाप

टध्वंसस्याप्युत्तरपटं प्रति विशिष्यहेतुत्वात् ॰ अन्यथा प्रागभाववादिनामपि तत्र प्रतीकारानुपपत्तिरिति संक्षेपः ॥ ला

घवादिति ॰ न च प्रागभावस्वीकारेऽपि कार्यस्य प्रतिबंधकत्वमावश्यकं अन्यथा यत्र पटोपष्टब्धतंतावेव पट्यंतरस्यारंभ तवंताम०

स्तो कं तु संयोगस्तत्र पूर्वपटसत्त्वेऽपि तन्नाशोत्तरभाविपटस्य पटोपष्टब्धतंतावुत्पत्तिप्रसंगात् तत्प्रागभावस्य सत्त्वात् ॰ त

नु याचलाघवोपन्यासोऽनुचितइतिवाच्यं·तत्रैवपूर्वोत्पन्नध्वंसेतंतावुत्तरपटस्यतदानीमुत्पत्तिवारणार्थंपूर्वपटध्वंसस्योत्तर दासीन
क्वापि प्रटंप्रतिहेतुतावश्यकत्वेप्रागभाववादिनाकार्यस्यप्रतिबंधकत्वाकल्पनादन्यथोदासीनतंतौद्रव्यसामग्र्याभावस्यतदा
मपि नींसत्वात्तत्रोत्तरपटस्यतदानीमुत्पत्तावेकतंतुकपटस्वीकारापत्तेरितिभावः।कार्यादेरित्यादिपदेनकार्यसमानकालोत्प
त्तिकध्वंसानांपरिग्रहः·तेननिर्विकल्पकव्यक्तीनांतृतीयक्षणेनाशेपिचतुर्थक्षणेपुनर्नोत्पादः·तत्तन्निर्विकल्पकसमस्य
कालोत्पन्नध्वंसैःप्रतिबंधादन्यथानिर्विकल्पकहेतुभूतायाःसन्निकर्षादिव्यक्तेस्तृतीयक्षणेप्यनुवृत्तेश्चतुर्थक्षणेपु
नस्तदुत्पत्तिप्रसंगात्।यद्यपिनिर्विकल्पकसमानकालोत्पन्नानंतध्वंसव्यक्तीनांतत्तन्निर्विकल्पकंप्रतिविशिष्यप्रतिबं त
धकत्वकल्पनामपेक्ष्यलाघवादेकप्रागभावएवहेतुःकल्पयितुमुचितस्तस्यचकारणत्वेनैवधर्मिग्राहकप्रमाणात्तः
सिध्यावेतरैर्विनिगमनाविरहः·नचतत्तन्निर्विकल्पकसमकालोत्पन्नवस्त्वंतरप्रागभावव्यक्तीनांतत्तन्निर्विकल्पकप्रा
त गभावस्यचात्तन्निर्विकल्पकंप्रतिहेतुत्वमित्यत्रविनिगमनाविरहस्तदवस्थएवेतिवाच्यं·तन्मभावत्वावच्छिन्नंप्रत्येवप्रा

२९

गभावत्वेन हेतुत्वं तत्र कार्यस्य तादात्म्यं कारणस्य प्रतियोगित्वं संबंध इत्यनुगतरूपेण हेतुतायां एकवस्तुप्रागभावस्य वस्त्वं
तरहेतुत्वासंभवात् तथापि पघ्नन्वयव्यतिरेकसिद्धविरोधकीनाममपि निर्विकल्पककालेत्यत्र ध्वंसानां प्रतिबंधकत्वं परित्यज्य वं
निर्विकल्पकहेतुत्वेन यदा पौनरं कल्प्यं तर्हि दाहादौ वपि मणिमंत्रादीनां प्रतिबंधकत्वमपेक्ष्य लाघवाद्दाहोपधायकत्वेन व वह्नीनां
स्त्वं तत्कल्पनाप्रसंगः तस्मात्क्रमवत्स्तूनां नियामकत्वासंभवस्य तुल्य एव कारणत्वेन वस्तुसिद्धिरित्याशयः शेषमशेषमप्येव
स्याद्यः सामग्रीक्षणत्वं न कार्योत्पत्तिप्राक्क्षणत्वव्याप्यमप्रयोजकत्वात् अतिरिक्तप्रागभावकल्पनापत्तिरूपप्रतिकूलत
र्कपराहतत्वाच्च किंतु सामग्र्यव्यवहितोत्तरक्षणस्यात्कार्योत्पत्तिमात्रस्यापि व्याप्तिः तत्र सामग्र्यव्यवहितोत्तरत्वं सामग्री च
समयध्वंसाधिकरणसमयध्वंसानधिकरणत्वं सत्तिसामग्रीसमयध्वंसाधिकरणत्वरूपं कार्यद्वितीयक्षणादावसिद्धं का
र्योत्पादक्षणेनैव व्यवधानात् इति कुतस्तत्र पुनरुत्पादः प्रसंजनीयः इत्यादिकं प्रतिबंधकत्वेनापीत्यपि कारणध्वंसितं। न इम्म०
नु तत्पूर्वत्वं तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तित्वरूपं प्रागुक्तं तत्र चोत्पत्तिः तदधिकरणक्षणावृत्तिप्रागभावप्रति

कार्योत्पत्तिद्वितीयक्षणादि४ द्वितीये४

योगिकालसमयसंबंधरूपैवनिविष्टासाचविनाप्रागभावं दुर्वचेत्यतआह तदुत्पत्तिश्चेति · स्वाधिकरणेति · यस्योत्पत्ति
र्लक्ष्यो तदेवघटादिकंस्वपदेनग्राह्यंतथाचतदधिकरणसमयध्वंसानधिकरणेन साकंतस्यसमयसंबंधः कालिकसंबंधः
तदुत्पत्तिरित्यर्थः घटाद्युत्पत्तिक्षणस्यापिविषयित्वव्यभिचारित्वसंबंधेन घटाद्यधिकरणीभूतं यत्पूर्वोत्पन्नज्ञानादिकं त
ध्वंसाधिकरणत्वात् उत्पत्तिमात्रेऽसंभवश्चेत्यादतः कालिकसंबंधेन स्वाधिकरणत्वलाभायाद्यं समयपदं · इह हेतत्खुपाधिने
ह्योपाधिरित्यादिप्रतीत्या व्यभिचारादिसंबंधस्याप्यधिकरणत्वनियामकत्वात् स्वरूपमेवाग्रेवक्ष्यमाणत्वात् अत्रत्यक्तव्यान
ष्टघटादिगोचरस्यज्ञानादेरुत्पन्नाव्यभिचारकं तत् अत्रमयात्त दृशज्ञानोत्पत्तिक्षणस्यापिविषयतयातज्ज्ञानाधिकरणी
भूतं यत्रष्टघटादि तद्ध्वंसाधिकरणत्वेनव्याप्तिप्रसंगात् घटेज्ञातमित्यादिव्यवहारबलेनविषयतायावृत्तिनियामक
ते त्वादितिध्येयं तद्घटादिसमयध्वंसानधिकरणीभूतेनतद्घटादिपूर्वोत्पन्नज्ञानादिनाविषयित्वादिसंबंधस्यपूर्वमपितत्तद्घ
टादौसत्त्वात्तत्रातिव्याप्तिवारणायद्वितीयंसमयपदं स्वत्वैवाच्यापसंवादमाह अध्वस्तेति अध्वस्तःक्षणायोग्यस्तदीयक्षणो

तेरे १ ननुध्वंसघटितोत्पत्तिक्षणे किंमानमित्याशंकायामा १

स्यमहाकालादेरु तदीय१

संबंधो यत्र कालेतादृशस्य क्षणस्य योगः कालिकसंबंधस्तस्य जनिरुत्पत्तिरित्यर्थः क्षणयोगध्वंसाभावावच्छिन्नं वस्तुनः स्य
क्षणयोगो जनिरित्यर्थो वा क्षणाद्व्यप्रवेशो वैयर्थ्यापत्त्या चेष्टक्षणाः समय इति प्रलयसत्वे तु उत्पत्तावव्याप्तिस्तदधिकरण
समयध्वंसाप्रसिद्धेः अत उक्तं महाप्रलयानंगीकार इति अत्र नीलादिविशिष्टघटादेरुत्पत्तिस्तन्नीलादिविशिष्टघटाध
धिकरणसमयमंतर्भाव्य निर्वाच्येति न पूर्वोक्तस्य घटे पाकान्नीलघटो जातः कर्मणा भूतसंयुक्तो जात इत्यादयो व्यवहा
रा उपपद्येयां तदंगीकारे महाप्रलयांगीकारे क्वचिदित्यादि अत्र यत्पदं यस्य घटादेरुत्पत्तिर्लक्ष्यीभूतस्य परं तद्घटीयतृतीय
क्षणसंबंधे तदीयद्वितीयक्षणवृत्तिध्वंसप्रतियोगित्वाभावात् तद्घटीयद्वितीयक्षणसंबंधे ऽतिव्याप्तिरतः क्वचिद
पीत्युक्तं तथा च यदीयसमयसंबंधसामान्ये यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्तीत्यर्थे लाभात् सामान्यांतर्गतप्रथ
मक्षणसंबंधे एव द्वितीयक्षणवृत्तिध्वंसाप्रतियोगित्वविरहान्नातिव्याप्तिः सचरमध्वंसीयसंबंधसामान्यस्य राम०
वत उत्पत्तिक्षणवृत्तिध्वंसप्रतियोगित्वाभावाच्च न महाप्रलयोत्पत्तावव्याप्तिः तद्घटादेः पूर्वोत्पन्नज्ञानादिविषयत्वा ना

तं१ स्व१ समय२

त्त दिसंबंधस्यापिसामान्यांतर्गतत्वात् तत्रचतद्दूराघुत्पत्तिक्षणावृत्तिध्वंसप्रतियोगित्वस्यैवसत्वात्तदुत्पत्तिमात्रेऽसंभ
वःस्यादतःप्रथमंसमयपदंतथाचतदीयसमयसंबंधसामान्येइत्यर्थःतेनतन्मात्रस्यैवसमयतयाविषयितयाज्ञान
तिथ्याम्रिरि स्यापितथात्वात्समयपदोक्तावपिज्ञानविषयत्वादावसंभवइतिप्रत्युक्तं प्रत्युक्तंचतदीयसमयसामान्यइत्यस्यैवस
म्यक्त्वेसंबंधपदंव्यर्थंइत्यादिदूषणंपत्यदार्थेनसमयस्यैतान्वयेनवैयर्थ्यानवकाशादितिध्येयंयत्रघटोत्पत्तिक्षणे प्राक्
तज्ज् सर्वध्वंसाइत्याकारकंज्ञानमुत्पन्नंतत्रज्ञानव्यक्तावासमंघटीयकालिकसंबंधस्यापिलक्ष्यत्वात्तत्राव्याप्तिःघटीयका
तज्ज् लिकसंबंधसामान्येएवविषयितयाज्ञानेवर्तमानस्यध्वंसस्यप्रतियोगित्वात् अतःकालिकसंबंधेनवृत्तेर्लोभाय
द्विच द्वितीयसमयपदंयद्यपिविषयितायावृत्त्यनियामकत्वाधट्टत्तिध्वंसप्रतियोगित्वंनास्तीत्युक्तावपिनोक्तदोषइतिवि
कालो ष्टंभाव्यतेतदापिघटद्वितीयक्षणावान्घटोत्पत्तिक्षणावत्वात् इत्यत्रहेतौघटाघक्षणासंबंधध्वंसउपाधिरितिप्रतीत्या
स्य व्यभिचारादिसंबंधेनघटोत्पत्तिक्षणेपिघटोत्पत्तिक्षणध्वंसस्सत्वादुत्पत्तिमात्रेऽसंभवएवस्यादतोद्वितीयंसमयपदंद्य

तदीयसंबंधसामान्यएव तदीयद्वितीयक्षणवृत्तिर्

स्य टादेः पूर्वोत्पन्नज्ञानादिविषयतायामतिव्याप्तेस्तृतीयं समयपदं त्वनुसमयसंबंधः कालिकविशेषणता सा च यदि समवाया
दिसंबंधवदेकैव नित्या न तु स्वरूपसंबंधस्तदा द्वितीयक्षणसंबंधस्यापि निरुक्तध्वंसाप्रतियोगित्वात्तत्रातिव्याप्तिरतस्त्राह
3) तदधिकरणेति यत्तु महाप्रलयवृत्तिध्वंसाप्रतियोगितात्वावच्छिन्नाभावाप्रसिद्ध्या तदुक्तावेव व्याप्तिः ध्वंसप्रतियो
गितात्वेनैव लघुधर्मेण तादृशप्रतियोगितावच्छेदादतस्तदधिकरणेत्यादीति तन्न ध्वंसगुरुधर्मस्य प्रतियोगितानवच्छेदक
त्वेऽपि मल्लक्षणेऽपि तदधिकरणक्षणावृत्तित्वस्याप्रसिद्धिप्रसंगात् । तदधिकरणक्षणावृत्तित्वनिष्ठप्रतियोगितायाः का
लिकसंबंधावच्छिन्नत्वतद्वृत्तित्वत्वेनैव लघुधर्मेणावच्छेदात्तज्जन्यमात्रस्यैव कालोपाधित्वात् यत्समयवृत्तिध्वंसप्रति
योगित्वं नास्ति तत्र तादृशप्रतियोगिताभावकूटस्यैवाविवक्षणे गुरुधर्मस्यानवच्छेदकत्वेऽप्युक्तव्याप्तेरभावाच्चेति दिक्
स्ववृत्ति इति । तथा च यत्समयवृत्तिध्वंसप्रतियोगित्वं यद्व्यक्त्यधिकरणक्षणवृत्तित्वव्याप्यं तेन साकं तद्व्यक्तेः समयसंबंधस्त्व रामः
स्य केन तत्संबंधित्वमित्यर्थः घटादेस्त्रिकालीनध्वंसप्रतियोगित्वं न घटाद्यधिकरणकालावृत्तित्वव्याप्यं न ह्येतन्मात्रस्यैव घटाद्यधि

करणस्यसूक्ष्मकालवृत्तित्वादित्यसंभववारणाय क्षणपदं॰ घटादिद्वितीयादिक्षणवृत्तिध्वंसप्रतियोगित्वस्यैव चिरातीतघ
टाद्यधिकरणक्षणावृत्तित्वसामानाधिकरण्याद्द्वितीयादिक्षणसंबंधेऽतिव्याप्तिरतो व्याप्यपदं॰ यद्यपि चिरविनष्टनिष्ठद्वि
तीयादिक्षणवृत्तिध्वंसस्य यत्किंचिद्व्यक्तिप्रतियोगित्वे घटाद्यधिकरणक्षणावृत्तित्वव्याप्यमेव तथापि तदधिकरणक्षणावृ
त्तित्वं यत्समयवृत्तिध्वंसप्रतियोगित्वव्यापकं तत्समयसंबंधवत्त्वं विवक्षितं॰ नचजन्यमात्रस्यैव कालोपाधित्वात्तद्वृत्तित्वं यत्स
मयवृत्तिध्वंसप्रतियोगित्वव्यापकं तत्समयसंबंधस्यैवोत्पत्तिरस्तु यथासन्निवेशे वैयर्थ्यविरहात् इति भावः॰ चिरातीतज्ञा
नवृत्तिध्वंसप्रतियोगिनः सर्वस्यैव घटाद्यधिकरणक्षणावृत्तित्वाद्घटादितिष्ठतदीयविषयत्वादिसंबंधेऽतिव्याप्तिरतः समय
संबंधेति॰ ननु तदधिकरणक्षणावृत्तित्वस्य तत्क्षणत्वस्ववृत्तिप्रतियोगिकप्रागभावानधिकरणसमयत्वं तत्प्रागभावं
विना दुर्वचमतस्तादृक्क्षणत्वं चेति॰ परंतु॰ स्वजन्यविभागप्रागभावावच्छिन्नकर्मत्वरूपं क्षणत्वं प्रागभावासत्त्वे दुर्वचमतोऽन्यथा
निर्वाच्यक्षणत्वं चेति॰ तन्न प्रलयोत्पन्नाव्याप्तिभिया विभागप्रागभावावच्छिन्नकर्मणः क्षणत्वशंकाया एवानुत्थापनात्

स्ववृत्तीति॰ स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोग्यधिकरणं यत्तदन्यसमयत्वमर्थः स्ववृत्तित्वं प्रतियोग्यधिकरणत्वं च कालिकसंबंधेन
बोध्यं तेन क्षणानां यथाकथंचित्संबंधेन स्वस्मिन्वर्तमानस्य स्वोत्तरोत्पन्नध्वंसस्य प्रतियोगित्वेपि नाव्याप्तिः न वा स्वस्मिन्कालि
32 कतया वर्तमानस्यैव ध्वंसस्य प्रतियोगिनः पूर्वोत्पन्नज्ञानादेर्विषयतयाधिकरणत्वेप्यसंभवः नित्यवस्तुव्युदासाय समयपदं
त्वक्षणमिदं क्षणिकस्यांत्यशब्दादेरंगीकार एवञ्चान्यथा क्रियादेः स्ववृत्तिध्वंसप्रतियोग्यधिकरणत्वात् प्रलयपूर्वक्षणमा
त्रे एवाव्याप्तिप्रसंगात् अतस्तदनंगीकारेप्याह स्ववृत्तीति॰ स्ववृत्तिर्यो ध्वंसस्तत्प्रतियोगिप्रतियोगिको यो [illegible] ध्वंसस्तत्तद्विशि वान्
ष्टसमयत्वमित्यर्थः तथा च क्षणिकपदार्थसत्त्वेपि स्थिरगगनमेवान्यक्षणावच्छेदेन तादृशयावद्ध्वंसविशिष्टतया क्षणत्व
मिति भावः यावद्ध्वंसविशिष्टसमयत्वं महाप्रलयान्यक्षणमात्राव्याप्तमतः प्रतियोगिकांतं तदपि ध्वंसविशेषणं॰ सृष्टिका
लीनक्षणमात्रस्यैव स्वोत्तरोत्पन्नपदार्थतंताभाववत्वात्तत्प्रतियोगिकध्वंसवैशिष्ट्याभावाच्चाव्याप्तितादवस्थ्यमतो ध्वंस राम०
च पर्यंतं॰ अत्र ध्वंसस्य स्ववृत्तित्वं कालिकसंबंधेन बोध्यं॰ तेन यथाकथंचित् व्यभिचारादिसंबंधेन तत्तत्क्षणवृत्तीनां तत्तत्क्ष

नष्टघटप्रतियोगिकर

रोगोत्तरोत्पन्नध्वंसानां कालिकसंबंधेन वैशिष्ट्यस्य तन्नाशरोगासुविरहेऽपि नाव्याप्तिः प्रहरादीनामपि स्ववृत्तिध्वंसप्रतियोगिप्र
तियोगिकयत्किंचिद्ध्वंसविशिष्टत्वादतिव्याप्तिरतो यावत्पदं। संयोगादेरपि स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकत्वाद्यावत्तद्वै
शिष्ट्यस्य च क्वचिदपि क्षरोगविरहादसंभवः स्यादतोऽभावनिरूपितस्य प्रतियोगितावि शेषस्य लाभाय चरमध्वंसपदं
तेनाभावत्वमपेक्ष्य जन्याभावत्वरूपस्य ध्वंसत्वस्य गुरुत्वेऽपि न क्षतिः तस्याप्रविष्टत्वात्। अभावत्वस्य च ध्वंसत्वस्याप्यखं
डत्वमतो वैयर्थ्यशंकानवकाशात्। सर्वध्वंसादितिज्ञानेऽपि निरुक्तयावद्ध्वंसानां विषयितया वैशिष्ट्यस्य क्षणाद्युपावच्छेदेन सत्वा
न्नत्रातिव्याप्तिरतः समयपदं कालिकसंबंधेन वैशिष्ट्यलाभाय परन्तु महाप्रलयावच्छेदेन गगनादेरपि निरुक्तयावद्ध्वंसविशि
य ष्टत्वादतिव्याप्तिरतः समयपदं जन्यार्थकमिति। न च। यथा कथंचित्संबंधेन स्ववृत्तित्वमादायाव्याप्तिर्भिया कालिकसंबंधेन स्व ति
वृत्तित्वस्य वाच्यतया तत्संबंधेन गगनादेर्वृत्तित्वाप्रसिद्धेरेव तत्रातिव्याप्त्यसंभवात्। महाप्रलयावच्छेदेन महाकालस्य तु तादृ
शयावद्ध्वंसविशिष्टतया लक्षणत्वेन क्षतिकरमिति ध्येयं। लाघवादाह स्ववृत्तीति यावदिति ध्वंसत्वं यदि जन्याभावत्वं नाखंडो

पाधिस्तदाजन्यत्वप्रवेशे वैयर्थ्यं· प्रागभावानंगीकारेणाभावत्वघटितस्यैव सम्पन्नत्वादित्याशयेन लक्षणांतरमाह स्ववृत्ती
ति· यावदभाववैशिष्ट्येन कस्यापि क्रियादेरतः स्ववृत्तीति· स्ववृत्तियावत्पदार्थवैशिष्ट्यमपि न कस्यचित् स्थिरस्यैतत्पद्याप्ति
रतउक्तमभावेति· कार्यासत्तिक्षणे सामग्रीक्षणे न नष्ट इत्यादिमवहारोपयिकं विनश्यद्वस्तुक्रियायाः क्षणात्वमुक्ताध्य
टपूर्वं तत्सामग्रीक्षणे जायत इत्यादि व्यवहारोपयुक्तमुत्पत्त्यवच्छिन्नक्रियादीनां क्षणत्वमाह स्वस्वेति· स्ववृत्तिः स्वनूस्वपूर्व
वर्त्ती यावान्पदार्थस्तद्विशिष्टसमयत्वमित्यर्थः स्ववृत्तियावत्पदार्थवैशिष्ट्यं स्वपूर्ववर्त्तियावत्पदार्थवैशिष्ट्यं वा न कस्यापि
स्व स्थिरस्य क्रियादेः संभवति स्वोत्तरे स्वत्वपूर्वे न नष्टयोः स्वस्मिन्नसत्वादिति उभयमुपात्तं पदार्थानीतेस्वरूपकथनं न तु प्रविष्टं तु
वैयर्थ्यात्· न च स्वस्योत्तरवर्त्तियावत्पदार्थविशिष्टत्वमित्येव सम्यक् वक्ष्यमाणस्वपूर्वत्वापेक्षया स्वध्वंसकालीनत्वरूपस्वो
त्तरत्वप्रवेशलाघवादंत्यक्षणावच्छिन्नक्रियादेरेव तथात्वादिति वाच्यं· स्वोत्तरवर्त्तित्वस्याप्रसिध्यामलपक्षणाव्याप्तिप्र राम•
स्व संगादिति भावः प्रहरादेरपि स्वपूर्ववर्त्तिपल्किंचित्पदार्थविशिष्टत्वात्तद्वारणाय यावदिति· न च यावत्वस्यैकस्याभावात्सा

चि तिस्विकरूपेणोपादानेऽप्यनतिप्रसक्तयत्किंचित्पदार्थप्रवेशावश्यकत्वे विशेषवैयर्थ्यमिति वाच्यं · स्वस्वपूर्ववर्त्तिपदार्थत्वव्या
पकतावच्छेदकव्यापकाधिकरणतावत्त्वस्यैव लक्षणत्वात् घटादेस्तेन तादृशव्यापकत्वलाभात्समयघटादेस्तु स्ववृत्तित्वस्य स्वपूर्व
वर्त्तित्वस्य तादृशयावत्पदार्थवैशिष्ट्यस्य च कालिकसंबंधावच्छिन्नत्वलाभाय तेन विषयत्वादिसंबंधेन स्वनिष्ठस्य चिराती
तज्ज्ञानादेरुत्पत्त्यवच्छिन्नक्रियादौ कालिकसंबंधेन वैशिष्ट्यविरहेऽपि नाव्याप्तिः · न वा क्षणमात्ररूपेव विषयतया स्वपूर्ववर्त्तिनः
कालिकसंबंधेन च स्थितिक्षणावच्छेदेन स्ववृत्तेर्ज्ञानस्याद्यक्षणावच्छेदेन कालिकतया वैशिष्ट्यविरहेऽप्यसंभवो नापि स्व
र्वपदार्थादिति ज्ञानस्याप्युत्पत्त्यवच्छिन्नस्य क्षणत्वाद्विषयितया तदीयवैशिष्ट्यस्य क्षणद्वयावच्छेदेन सत्वात्तत्रातिव्याप्तिरि
नु तिनैक्षणलक्षणांतर्गतं · स्वपूर्ववर्त्तित्वं स्वोत्पत्तिकालीनध्वंसप्रतियोगित्वं तदंतर्गता चोत्पत्तिः क्षणाघटितेति तत्त्वान्योन्याश्रयोऽतम इत्य
तम्राह स्वपूर्वत्वं चेति · स्वाधिकरणीभूततत्तृतीयादिक्षणावृत्तिध्वंसप्रतियोगिकालवृत्तिः स्ववृत्तिपदार्थस्याद्यक्षणावच्छेदेन
न्य स्वस्मिन्वैशिष्ट्याभावात्तत्त्वयाऽऽद्यक्षणमात्राव्याप्तिरतः पूर्वत्वनिरुक्तौ यावदिति कालविशेषणं दत्तं · ननु क्रियामात्ररूपेव न्य

कालोपाधित्वात्तल्लक्षणमिदं मत्लयक्षणाव्याप्तं· एवं तदुत्पत्तावुत्पत्ति[illegible]लेंऽम पीत्यत आह जन्येति· मात्रपदं कृत्स्नार्थ क्षण

कं तथा च तदानीं क्रियाया अभावेऽपि चरमध्वंसरूपकालोपाधिमादायैव लक्षणसमर्थनमिति· नित्यस्य कालिकसं

३५ बंधेनाव्यावृत्तिकतया जन्यावच्छिन्नस्यैव तस्य कालोपाधित्वं वाच्यमतो जन्यस्यैव तथात्वमुचितमित्याशयेन पदार्थमात्रेप

रित्यज्य जन्यमात्रस्येत्युक्तं· केचित्तु· ननु महाप्रलयावच्छेदेन स्ववृत्तियावद्ध्वंसविशिष्टत्वादिलक्षणाक्रांतस्य महा

लक्ष्य कालस्यापि क्षणत्वात्तत्रेदं लक्षणमव्याप्तं निरुक्तस्वत्वाप्रसिद्धेरत आह जन्यमात्रस्येति· तथा चोत्पत्तिघटकक्षण

त्वस्य महाकालेऽसत्त्वेऽपि न क्षतिः जन्यं कालोपाधिरूपं क्षणमादायैव सर्वत्रापि तल्लक्षणसंभवादिति भाव इत्याहुः

केषांचित्तु स्वत्तित्वलक्षणमाहुर्योयदित्यादि· सर्वैध्वंसाद्यत्याकारविनश्यदवस्थवुध्यासार्धं घटीयकालिकसंबंधस्या

पिलक्ष्यतया तत्राव्याप्तिः तादृशवुद्धेर्विषयितयावर्त्तमानस्य ध्वंसस्य प्रतियोगिनि भाविकाले घटस्य वृत्तेरतो ध्वं णम०

६ सस्य कालिकसंबंधेन वृत्तित्वलाभाय कालपदं· एवं तर्हि ध्वंसप्रतियोगिवृत्तित्वं तस्य तद्वृत्तित्वमित्यत्र च वृत्तिमत्त्वं का

त्तिकसंबंधेनबोध्यं·तेनातीतविषयकज्ञानस्योत्पत्तौ नाव्याप्तिः विषयतासंबंधेऽतिव्याप्तिर्वोध्यश्च·तत्तत्समयवृत्ति त्र
ध्वंसप्रतियोगिवृत्तित्वे सति तत्तत्समयवृत्तित्वरूपात्तत्तत्क्षणोत्पत्तत्वयावद्वस्तुनामेकैवोत्पत्तिर्नेत्याश्रयभेदेनविभि
न्नायस्तस्योत्पत्तयोर्लक्ष्यप्रदर्शनमात्रपरत्वात्·नचध्वंसप्रतियोगिवृत्तित्वमपेक्ष्य महाप्रलयवृत्तिध्वंसप्रति त्व
त्व योगिवृत्तित्वस्य गुरुत्वात्तदवच्छिन्नाभावाप्रसिद्ध्या महाप्रलयोत्पत्तावव्याप्तिरिति वाच्यं·प्रागेव दत्तोत्तरत्वादिति
ध्येयं·स्वानधिकरणास्थिति·तंतुमात्रस्यैव तंतुत्वेन तत्पटस्वरूपयोग्यत्वात्तदनधिकरणतंतुष्वपि तत्सामग्रीसत्वा
दितिभावः नचतत्पटत्वस्य कार्यतानवच्छेदकत्वात्तदवच्छिन्नस्यान्यत्रायत्तसंभवः द्·पटत्वावच्छिन्नसामग्रीसत्वेव
पटत्वावच्छिन्नमात्रोत्पद्यत एवेति वाच्यं·पटमात्रस्यैव तत्पटत्वेन कार्यत्वस्यावश्यकत्वात्·अन्यथा यत्र तंतुत्रयप्रा
रब्धपटस्यैव तंतुनाशाद्विनाशे सति उत्तरक्षण एव तदारंभकतंत्वंतरस्य नाशस्तत्र तदानीमेवावस्थिततंतौ पटांत
रोत्पादप्रसंगात्·पटत्वावच्छिन्नस्य सामग्रीसत्वात्तन्न चेष्टापत्तिः एकतंतुकपटस्यानंगीकारात्·नच विनश्यत्तंतुप्रा

दायपटोत्पादः कार्यकालतावृत्तेः समवायित्वायोगात् । तस्मात्प्रसिद्धतन्तुत्पटव्यक्तिं प्रति विशिष्य कृत्स्नकारणस्य विर
त हादेव तैर्न पटस्य मान्यस्यानुत्पत्तिरतस्तत्तन्तुपटत्वावच्छिन्नस्यापि स्वानधिकरणेऽनुपपत्तिसंभव इति भावः सहस्रादी
२५ नामिति । तदारंभकेत्यादिः तत्तत्तन्तुत्वेनेत्यादि न च समवायेन तत्पटं प्रति तादात्म्येन तत्तन्तुत्वेन हेतुत्वे मिथो व्यभिचा
रः कालिकसंबंधेनैव विशेषतः कार्यकारणभावस्तु न तत्पटस्यानधिकरणे तन्तुषूत्पत्तिवारकः संभवतीति वाच्यं । तत्तन्तु त
निरूपितसमवायेन तत्पटं प्रत्येव तादात्म्येन तत्तत्तन्तोर्हेतुत्वात् । तादृशसमवायेन तत्पटस्यान्यत्र तन्तावसत्त्वेन व्यभिचा
रासंभवात् न चैवं तादृशसमवायेन स्वानधिकरणे तन्तुषु तत्पटस्यानुत्पादेऽपि समवायमात्रेण तत्तैरपटोत्पादो दुर्वा
र इति वाच्यं । समवायमात्रस्य तादृशकार्यतानवच्छेदकतया तत्संबंधेनान्यत्र तत्पटोत्पत्त्यसंभवादिति भावः । य
तु समवायेन तत्पटत्वावच्छिन्नं प्रत्येव तत्तत्तन्तुत्वेन हेतुत्वं तावत्तन्तुनिष्ठसहस्रत्वादिकसंख्यापा एव कारणताघटक राम०
ते संबंधेन व्यभिचारासंभवादित्याहुः । यस्य तन्तोर्द्वितीयक्षण एव तन्त्वन्तरसंयोगोत्पत्तिस्तृतीयक्षणे सहस्रतन्तुक

पटोत्पत्तिस्तत्रैव तंतौ व्यभिचारतादवस्थ्यात् सहस्रत्वादिसंख्यायाः समानाधिकरण्यावदेकत्वसापेक्षितत्वपादृष्यो
त्पत्तिद्वितीयक्षणे तदसंभवात्। केचित्तु यावंतः कार्यतावच्छेदकधर्मावच्छिन्नास्तत्रमेकस्य यत्र किंचिदाश्रयनिष्ठा
भावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणताघटकं तथा च समवायेन तन्तुत्वावच्छिन्नं प्रत्येव तादात्म्येन तत
न्तंतुत्वेन हेतुत्वं स्कघटं। तत्पटाश्रयीभूततत्तत्तंतौ तत्तत्तंतुभेदस्यासत्वात्। एतेन संयोगादिकं प्रत्यपि कर्मादेः कारण
त्वं व्याख्यातं। न चैवं द्विक्षणस्थायिद्रव्येयिद्वित्वाकत्पत्तिः स्यात्। द्रव्यांतरैकत्वमादाय उक्तक्रमेण सामग्रीसत्वादि
ति वाच्यं। इष्टत्वात्। यावत्त्वप्रवेशस्तु वह्नित्वावच्छिन्नं प्रत्येव तृणत्वादिना हेतुत्ववारणार्थं न चैवं कार्यसमानाधिक
रणावृत्तिधर्मवत्त्वमेव कारणत्वे निवेश्यतामन्यथासिद्धिनिरूपकत्वदले नैव व्यापकतानवच्छेदकांतरव्युदासः सं
भवादिति वाच्यं व्यभिचारग्रहाप्रतिबध्यतया तत्कारणतास्वरूपत्वायोगादित्याहुः। ननु क्वापि प्रागभावव्यक्तिः
कथं नान्यत्र कार्यभंजयतीत्यत आह सचेति। सामानाधिकरण्यप्रत्यासत्त्यैव तस्य हेतुत्वादिति भावः। नन्वेवमपि द्वितं

तुविभावनीयं· प्रागभावस्वीकारेपि तत्तत्तंतुव्यक्तीनां तत्तच्चरमतंतुसंयोगव्यक्तीनां वा तत्पटं प्रति विशिष्यहे
तुत्वस्यावश्यकत्वेक्तं प्रागभावकल्पनयेत्याशयेन समाधत्ते· त्रिचतुरेष्वेवेति· ३

तुकपटादौ न तत्सिद्धिः तत्रातिरिक्तस्य प्रागभावधर्मिणः कल्पनामपेक्ष्य क्लृप्ततंतुसंयोगव्यक्तेरेव लाघवेन हेतुत्वौ
36 चित्यात् अत्र तत्राह इत्थं चेति· कार्योत्पादनियामकतया चेत्यर्थः प्रागभावत्वेनेति· तत्तत्प्रागभावव्यक्तिषु भावत्वासि
द्धौ तादृशप्रागहेतुत्वाभिधानमनुचितमिति त्रिचतुरेष्वेवेति· अप्रमत्ताधिकारेणासंयत्तत्पर्यमाह· संयुक्तेषु चेति· त्रितंतुकस्य
चतुस्तंतुकस्य वा पटस्यावशेषमुत्पत्तेः पटसामान्यापत्त्यसंभवादाह· तत्पटेति· सहस्रादितंतुकपटोत्पत्तिप्रसंग इ
त्पट त्यर्थः प्रागभावादिघटितायास्तै सामग्र्याः तदानीमपि सत्वादिति भावः यद्यपि सर्वत्रैव खंडपटध्वंसस्य महापटहे
तुतया त्रिचतुरादितंतुकपटस्य ध्वंसविरहादेव त्रिचतुस्तंतुसंयोगदशायां न सहस्रादितंतुकपटस्योत्पाद इति चरमतं
तुसंयोगादेस्तत्र विशिष्यहेतुत्वे मानाभावः न च खंडपटध्वंसस्यैव चरमसंयोगव्यक्तीनामपि विनिगमनाविरहादेव
तत्र हेतुत्वमिति वाच्यं· चरमसंयोगोत्पत्त्यनंतरं खंडपटध्वंसदशायामेव महापटोत्पत्तिप्रसंगेन खंडपटध्वंसस्यावश्यं गमा०
महापटहेतुत्वात् तथापि त्रिचतुरादितंतुकखंडपटध्वंसस्यैव स्वसमानाधिकरणसहस्रत्वादिसंख्यासंबंधेन स

हृस्वादितंतुकमहापटंप्रतिहेतुत्वादेवस्वात्तधिकरणतंतुषु तत्पटानुत्पत्तिसंभवेप्रागभावकल्पनेमानाभावइत्य
त्रेतास्यर्थेः शंकतेतावदिति। विनेति। तंतुतत्तसंयोगयोस्तंतुत्वविलक्षणसंयोगत्वाभ्यांपटंप्रतिहेतुत्वेनतदवच्छिन्नवि तत्
रहस्यासंभवादितिभावः कार्यानुत्पादप्रयोजकस्याभावमुक्त्वाकार्योत्पादप्रयोजकस्यसत्त्वमाहसामग्रीति। पुनः शं
कतेतत्पटेति। यावत्तंतुत्वेनहेतुत्वस्यासंभवादाश्रयांतं। तत्पटप्रागभावाश्रयस्यकस्यचित्तंतोः सत्वादतिप्रसंगतादव
स्थ्यमतोयावदिति। प्रवेशेत्यादि। प्रवेशेकारणतावच्छेदकतयान्यथासिद्धत्वमप्रवेशेतुवस्तुगत्यातत्पटप्रागभावाश्र
याणांमेवतंतूनांयावत्तंतुत्वेनहेतुत्वेनप्रागभावस्यहेतुत्वमानाभावइत्यर्थः ननुमाभूत्प्रागभावस्यहेतुत्वंकारणता
वच्छेदकतयैवतोत्पत्तिर्भविष्यतीत्यतआह परस्परेति। तत्पटप्रागभावाश्रययावत्तंतूनांतदानीमनपायादितिभावः।
तत्पटप्रागभाववद्व्याप्येति। तत्पटप्रागभावोनधिकरणावृत्तीत्यर्थः संयोगस्त्वारंभकोग्राह्यः। तेनतत्पटप्रागभाववद्भा
२। त्रवृत्तीनामनारंभकसंयोगांतराणांतत्पटोत्पत्तेःपूर्वे[illegible]सत्त्वेपिनक्षतिः तत्पटप्रागभावसामानाधिकरण्यस्यतत्पट[illegible]नाधार २।
म२

तंतुवृत्तिपटांतरारंभकातीतसंयोगसाधारणत्वाद्व्याप्यतायर्यंतानुसरणं॰ तंतुसंयोगेष्विति॰ पटारंभकेष्वित्यादिः ननु तंतुप त
३। टव्याकुंचनवृत्तित्वे नापि संयोगानां निवेशेन शेषदोषस्य तत्राह॰ तत्पटेति॰ तथा च लाघवात्तत्पटव्याप्यतादृशयावत्तंतुसं
योगत्वेनैव तत्पटप्रतिहेतुत्वसंभवादवच्छेदकतयापि तत्प्रागभावसिद्धिरिति भावः ननु पटस्यैव तन्नियतसंख्याविशेषस्या
प्युत्क्रमेणावच्छेदकत्वे विनिगमकाभावात्तल्लघुरपि तत्पटो नावच्छेदकः किंतु तत्प्रागभाव एव धर्मिग्राहकप्रमाणेन
तथैव तस्य सिद्धेरित्यत आह यावत्त्वेति॰ तथा च तादृशसंयोगविषयावत्त्वमपेक्षाबुद्धिविशेषविषयत्वमेव तत्त्वापेक्षाबुद्धि प्या
व्यक्तीनां भेदाद्भिन्नमित्यर्थः॰ नन्वेतत्कार्यकार्यकारणभावकल्पनाश्चौ व्यर्थमतिरिक्तप्रागभावस्यावच्छेदकतया कल्पनानु
मिति भावः॰ अत्र वदंति॰ यत्र क्रमेणानंतानां तत्संयोगानां वा जननेनोत्तरं पटस्योत्पादः तत्र प्रागेव तत्पटस्योत्पादवारणार्थं
चरमस्य तंतोः तत्संयोगस्य वा विशिष्य हेतुतावश्यकत्वेन तत्र एकोदासीनतंतुषु पटस्योत्पत्तिवारणेऽपि यत्र समस्ततंतु राम०
तत घटकदैवोत्पन्नेषु संयुक्तेषु च पटस्योत्पत्तिस्तत्र पटस्यान्यत्रोत्पादवारणाय प्रागभावः कारणतया कल्प्यते॰ तत्र तंतु

संयोगानां विशिष्यहेतुत्वकल्पनयातिद्वारणे गौरवात् नहि तत्रापि तस्योत्पत्तेः पूर्वं तैस्तदारंभकैस्तंतुद्व्यारंभकसं
योगाः येन तदानीं तत्पटस्योत्पादवारणार्थं विशिष्यसंयोगानां हेतुत्वमावश्यकं स्यात् नच तत्तत्स्वत्वेनैव तादृश
परं प्रति तत्तंतूनां तादात्म्येन हेतुत्वान्नान्यत्र तस्योत्पाद इति वाच्यं कार्यत्वेन कारणतायामन्यथासिद्धेः अन्यथा द्रव्य
चाक्षुषत्वावच्छिन्नं प्रत्यपि चाक्षुषवत्त्वद्रव्यत्वादिनैव हेतुत्वसंभवे रूपादीनामहेतुतापत्तेः समस्तस्यारंभकतंतुसंयोग
त नाशनष्टस्यापि पटस्य पुनस्तदारंभकतंतुषूत्पत्तिप्रसंगेन तदारंभकसंयोगानां विशिष्य तत्पटं प्रति हेतुत्वकल्पने म
हागौरवापत्तेः अस्माकं तु प्रागभावविरहादेव नष्टस्य पुनर्नोत्पादः यत्तु युगपदुत्पन्नैः संयुक्तैः सहस्रतंतुभिर्जनित श्र
स्य पटस्यान्यत्रोत्पत्तिवारणार्थं तावत्तंतुपर्याप्तायास्तत्पटारंभकसंयोगसमकालोत्पन्नसंख्याव्यक्तेरेव तत्पटं प्रति विशि
ष्यहेतुत्वं युक्तं तावतैव तदानीमन्यत्र कालांतरे वा तावत्तंतुषु तत्पटस्योत्पादवारणादिति तन्तुच्छं यस्पवं तेषु द्वितीयक्ष
णएव तंत्वंतरसंयोगोत्पत्त्या तृतीयक्षणे सहस्रतंतुकपटोत्पत्तिस्तत्रैव तंतौ व्यभिचारात् सहस्रत्वादिसंख्यायाः समाना

76 धिकरणायावदेकत्वसापेक्षतयाद्व्यणुकोत्पत्तिर्द्वितीयक्षणेतदसंभवात्·किंचतादृशसंख्यात्मकानांतत्तद्व्यक्तित्वेनतत्पत्प्र
तिहेतुत्वेऽनंतकार्यकारणभावापत्तिः नावत्तंतुपर्याप्ततादृशसंख्यात्वेनहेतुत्वेचमहागौरवमतस्तत्प्रागभावव्यक्तित्वेनतत्स्व यर
हेतुतयाकल्पयितुमुचितात्कारणतयैवव्यभिग्राहकप्रमाणासिद्धायाः तस्याः पदार्थांतरत्वसाद्धे विनिगमनाविरहस्यासं
भवादितिदिक्·नव्यास्तुप्रागभावानंगीकारेचतुर्थक्षणवृत्तिध्वंसप्रतियोगिकायाद्व्यपेक्षाबुद्धिव्यक्तेस्तृतीयक्षणेध्वं
सः स्यात्। नच द्वित्वप्रत्यक्षसामग्र्याः प्रतिबंधकत्वंवाच्यं तथासति चतुर्थक्षणेपिध्वंसोनस्यात्। चक्षुःसन्निकर्षादि
रूपद्वित्वनिर्विकल्पकसामग्र्यास्तदानीमपिसत्वात्। प्रागभावस्वीकारेतु द्वित्वनिर्विकल्पकोत्पत्ताकृतत्प्रागभावस्यैव
प्रतिबंधकत्वाददोषइतिस्वाषिवदंतितत्रअवाधिनेद्व्यस्यासमवायिकारणानामेकत्वादीनांनिमित्तकारणस्यापेक्षा
त्रि बुद्ध्यादिविशेषाणांकुचिदेवतत्रद्वित्वादिकंजायतेकचित्रेतिनियमोनस्यात्स्वतोयावतितत्रद्वित्वादिप्रागभावस्तावत्स्वेवतत राम०
त्रित्वाद्युत्पत्तिरितित्रित्वाद्युत्पत्तिनियामकतयैवप्रागभावसिद्धिरित्याचार्यमतंदूषयति एतेनेति· कस्यचित्समवायि

नस्तन्निष्ठैकत्वस्यवाऽनुत्पत्तिदशायामपितत्तन्नित्वाघत्पत्तिप्रसंगोनचरमस्यसमवायिनस्तदेकत्वस्यवातत्रविशिष्यहेतुता
त्रि श्चेत्यतद्विरहादेवान्यत्रत[redacted]त्वाकत्पत्तिसंभवेप्रागभावेमानाभावेनेत्यर्थः द्वित्वस्थलेऽतिरिक्तप्रागभावधर्मिरणस्तत्रान
न्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोः कल्पनामपेक्ष्य समवायिनश्चरमैकत्वस्यैवैन्यथासिद्धत्वकल्पनंलघीयइतिद्वित्वात्तु बा न
स्त्रि रोधान्नप्रागभावः सिध्यतीत्यत[redacted]त्वपर्यन्तानुसरणं। केचित्तु तत्त्वज्ञानिनः शुकादेः सत्त्वामपिविहितनिषिद्धक्रियायांधर्मा
धर्मयोरनुत्पादात्तज्जनकतयातत्त्वज्ञानप्रागभावः सिध्यतीति नचोत्पन्नेपितत्त्वज्ञानेतादृशज्ञानात्तरंप्रागभावसत्त्वा
त्तदानींधर्माद्युत्पत्तिप्रसंगः समानकालावच्छिन्नैकात्मवृत्तित्वसंबंधेनतत्त्वज्ञानशून्यत्वेनप्रागभावस्यविशेषणीय
त्वात् नचैवंतिरुक्तप्रत्यासत्त्यातत्त्वज्ञानाभावविशिष्टप्रागभावत्वेनैवहेतुत्वमुपेयंतत्त्वधीप्रागभावत्वस्यवैशेष्यगौरवात् त
थाचायतत्त्वज्ञानकालीनस्वगुणांतरप्रागभावानामपिहेतुत्वापत्तिरितिवाच्यं तादृशरूपेणहेतुतायामिष्टत्वात् नचोक्तक्र
मेणतत्त्वधीप्रागभावस्यहेतुतामपेक्ष्यलाघवान्मिथ्याज्ञानवासनाया एवधर्मादिहेतुत्वंयुक्तमितिवाच्यं आत्मधर्मिक

क्रमेण १

४१

गौरवं स्थूलत्वादिप्रकारकत्वविशेषणस्य मिथ्याज्ञानवासनात्वस्य नानात्वेन गुरुत्वेन च तादृश्येण धर्माधर्मोत्पत्तिजनकत्वात्। न चो
तत्त्वज्ञानत्वमनात्मधर्मिकदेहात्मत्वादिप्रकारकत्वमेवेति तद्घटितकूटस्य प्रागभावत्वेनापि हेतुत्वेऽननुगमो गौरवं चेति
वाच्यं मानसत्वव्याप्यमुक्तिजनकतावच्छेदकवैजात्यस्यैव तत्त्वज्ञानपदेनोपलक्षणात्। न च मिथ्याज्ञानवासनाया अपि ध
र्मादिजनकत्वं भावनात्वव्याप्यवैजात्यविशेषेणैव वक्तव्यमतो न गौरवमिति वाच्यं मिथ्याज्ञानोत्तरं तादृशवासनोत्प
त्तिदशायामपि धर्माद्युत्पादाद्भावनात्वव्याप्यवैजात्येन हेतुत्वासंभवात् इति प्राहुः। तेषां धर्माधर्मोत्पादनियामकत्वे
त नवस्त्वंतरसिद्धावपि तत्र तत्त्वज्ञानप्रागभावस्य सिद्धौ प्रमाणाभावो मन्तुचिंतनीयं। ननु क्रमेणासिद्धस्यापि प्रागभावस्य प्रतियो
गिहेतुत्वं नागतमित्यतस्त्राह वर्णियंत्राविद्धव्याप्यवृत्तेरिति द्वितीयक्षणोत्पत्तिनिवारणायेत्यन्वयः। तथा चाग्रावच्छेदे
दि नोत्पन्नायाः संयोगव्यक्तेर्द्वितीयक्षणेऽपि नोत्पादः स्यात् मूलावच्छेदेन तदभावसत्त्वात् कार्यस्य प्रतिबंधकत्वासंभवात्। रा म०
च अग्रावच्छिन्नं तत्तत्संयोगं प्रत्यग्रावच्छिन्नत्वविशिष्टतत्तत्संयोगाभावत्वेन हेतुतायां गौरवात् तत्तत्संयोगप्रागभावत्वेन हेतु नै

स्य २ — तत्तत्संयोगं प्रति १

त्वंयुक्तमितिभावः। ननु घटादिसंयोगसामान्यं प्रत्येव समानावच्छेदकत्वप्रत्यासत्त्या घटादिसंयोगसामान्याभावस्य हेतुत्वं वा
च्यमतो न गौरवं न चैवमपि प्रत्यक्षसिद्धं प्रागभावमादाय विनिगमनाविरहः। तस्य घटसंयोगप्रागभावत्वेन हेतुत्वे घटीय
संयोगांतरप्रागभावमादायैवोत्पन्नस्य तस्यापि पुनः प्रसंगात् तत्तद्घटसंयोगव्यक्तौ तत्तत्संयोगप्रागभावत्वेन हेतुत्वे चा
नंतकार्यकारणभावापत्तेः। गौरवस्यैव विनिगमकत्वादित्यत आह धारावहने ति। ननु तत्तत्संयोगाभावस्यैवैनिरव संता
च्छिन्नविशेषणतयैव तत्तत्संयोगं प्रति हेतुत्वं वाच्यमतः रुह्यानंतरमनुसरति धारावहनेनीत्याहुः। धारावहने तु कृत्या पया
जनकीभूतात्ममनःसंयोगादिव्यक्तीनां च चतुर्थक्षणे सत्त्वमावेदितं तेन तत्कारणाव्यवहितप्राग्भावप्रयुक्तायाः कार्योत्प
क त्तेर्नावसरः। सविकल्पस्य स्वकारणीभूतज्ञानव्यक्त्यभावादेव चतुर्थक्षणे नोत्पादः संभवतीत्यतो निर्विकल्पकं तु पर्यंता
सरणांशांशिकनिर्विकल्पकस्यापि विशेषणज्ञानसापेक्षत्वात्तार्यमिकेति तेन सप्रकारकान्यज्ञानलाभः। द्वितीयतृ
तीयक्षणयोः स्वात्मककार्यं प्रतिबंधसंभवाच्चतुर्थक्षणाद्यनुक्तं न च तत्रैव निर्विकल्पकं प्रतितत्समानकालोत्पन्न

तत्तद्विशेषणा २

व ध्वंसविशेषस्यैं प्रतिबंधकत्वं तदुत्पत्तिकालपर्यंतस्थायिद्वित्वविशेषस्यैं जनकत्वमस्तु नतु कार्याभावस्योत्तरज्ञाना वा
४० भावस्य च द्वयोर्हेतुत्वमतो न गौरवमिति वाच्यं तादृशध्वंसानां द्वित्वादीनां च बहूनां विनिगमनाभावेन तथात्वेमपि स्वल कल्पना
घवेनैकस्यैव तन्निर्विकल्पकप्रागभावस्य तन्निर्विकल्पकहेतुत्वेन कल्पनार्हत्वात् अतींद्रियस्य निर्विकल्पकस्य प्रा
गभावस्य प्रमाणांतरासिद्धतया तेन सार्द्धं विनिगमकाभावस्य वक्तुमशक्यत्वादिति भावः ननु तत्तत्संयोगं प्रति तत्तत्सं
योगप्रागभावस्य लाघवेन हेतुत्वसिद्धावपि मूर्त्तावछेदे न जायमानः श्येनसंयोगः कुतोऽग्रावछेदेन जायते स्वरू
ना पसंबंधेन तत्तत्प्रागभावस्याभयावछेदेप्यविशिष्टत्वात् अत आह स्वभावेत्यादि। तथा च प्रागभावस्यावछिन्नवृत्ति
त्वसंयोगस्यावछिन्नवृत्तितानियामिका समानावछेदकत्वप्रत्यासत्त्यैव तस्य प्रतियोगिहेतुत्वादिति भावः अत्र क
ल्पयंत इत्यनेन साधारणप्रत्ययस्यासत्त्वमावेदितं। वरोर्यंतीत्यनेन च निर्विकल्पकसामान्यं प्रति ज्ञानेंमात्रेयेयैव प्रति राम०
बंधकत्वकल्पनया तच्चतुर्थक्षणे पुनर्निर्विकल्पकासंभवात् तस्य तदुत्तरज्ञानस्य चाभावद्वयैंकारणं तु वाच्यमिति तत्र
वेनैर

स्वरसः सूचितः। तत्तत्संख्याविशेषणाभिति सहस्रतंतुकपटादौ चरमतंतुसंयोगोत्पत्तिकालीनस्य सहस्रत्वादिसंख्या
विशेषस्यैवांततः परमेश्वरीयापेक्षाबुद्धिजन्यस्य सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वांगीकारेणैव स्वानधिकरणा
तंतुषु तत्परस्यानुत्पादसंभवेपीत्यर्थः। यस्य तंतोर्द्वितीयक्षणे एव तंत्वंतरसंयोगोत्पत्त्या तृतीयक्षणे सहस्रतंतुक
पटोत्पत्तिस्तत्रैव तेनाव्यभिचारात् सहस्रत्वादिसंख्याया हेतुत्वमसंभावितं एकत्वान्यसंख्यामात्रस्यैव समानाधिकरण्या
यावदेकत्वसापेक्षतया द्व्यणुकोत्पत्तिद्वितीयक्षणे तदसंभवात् पुरुषकालभेदेन सहस्रत्वादीनामनंतत्वेनानंतकार्यकार
णभावायत्तिगौरवं चेति। द्व्यणुकोत्पादनियामकत्वेनापि प्रागभावः कल्पयितुमुचित एवेत्याशयेनोक्तसंभवेपीति। क्रमो
त्पन्नस्थूलैकस्याश्रितसमवायिव्यक्तेस्तदेकत्वस्य वाऽनुत्पत्तिदशायामपि कारणांतरसत्त्वमादाय प्रागभाववादिनाम
पि त्रित्वोत्पत्तिप्रसंगात्। उत्पत्स्यमानसमवायिव्यक्तेस्तदेकत्वस्य वा विशिष्य हेतुताध्रौव्ये प्रागभावकल्पनेऽर्थम
तो युगपदुत्पन्नपर्यंतानुसरणं। पूर्वोक्तयुक्त्या द्वित्वोत्पादनियामकत्वेन प्रागभावो सिद्ध इत्याह त्रित्वादीति। नियामकत्वे

५१

नेति॰ अन्यथा युगपदुत्पन्ननिष्ठत्रित्वादेः स्वानधिकरणे घटादिद्रव्येषु उत्पत्तिप्रसंगात्॰ नचापेक्षाबुद्धिव्यक्तेरेव विशिष्य
हेतुत्वान्नातिप्रसंगः स्वानाश्रयमादाय अपेक्षाबुद्धेरपि त्रित्वजनकत्वदर्शनात्॰ नच तत्तद्व्यक्तिनिष्ठैकत्वान्यतमस्यासा सं
मान्यं प्रति तत्तद्व्यक्तिनिष्ठत्वविशिष्टत्वसंबंधेनैकत्वप्रकारकनिश्चयत्वेनैवापेक्षाबुद्धेर्जनकत्वं प्रकारांतरेणाननुगम
संभवात् तथाच तत्तदेकनिष्ठत्रित्वादेरन्यत्र द्रव्येऽनुत्पत्तिसंभव इति वाच्यं॰ पुरुषत्रयाणां घटादिविभिन्नद्रव्यव
र्तिकैकत्वज्ञानत्रयादपि तेषु त्रित्वोत्पत्तिप्रसंगेनापेक्षाबुद्धेस्तादृशरूपेण हेतुत्वादिति भावः॰ अन्ये त्वित्यस्य स्वरसवीजं तु द्र
व्यांतरकर्माधीनस्यैकनिष्ठसंयोगादेरन्यत्रोत्पत्तिवारणाय अवश्यं तत्तद्द्रव्यसमवेतकार्यत्वावच्छिन्नं प्रति तत्तद्द्रव्यत्वेन
हेतुत्वं वाच्यं अतस्तद्द्रव्यत्वादेवान्यत्र न तदीयत्रित्वाद्युत्पादः किंतु त्रित्वाद्यंतर्भावेणानंतप्रागभावहेतुत्वेन नच का त
बं र्यत्वस्य कालिकसंबंधेन घटत्वादिमत्त्वस्यापि विनिगमनाविरहेण कार्यतावच्छेदकेऽनुप्रवेशादनंतकार्यकारणभा रा१०
क॰ वावश्यकत्वमिति वाच्यं॰ समवेतत्वकालिकोभयसंबंधेन तत्तद्द्रव्यवत्त्वावच्छिन्नं प्रति तत्तद्द्रव्यत्वेन हेतुत्वस्योक्तत्वात्॰ स्येव

लपट२

नित्यवृत्तिधर्मस्यापि जन्यतावच्छेदकत्वपक्षे तत्तद्व्यक्तिसमवेतत्वावच्छिन्नं प्रत्येव तत्तद्व्यक्तित्वेन हेतुत्वसंभवाच्च
ति ~~क्षत्तद्व्य~~ दूषणं · मिश्रोक्तं सामान्यप्रत्यासत्तौ युक्तं यत्तत्रानुपपत्त्या दूषयति · यत्वित्यादि · ज्ञाने छेति · ज्ञानेच्छयोरिच्छा
कृत्योश्चेत्यर्थः तदुपरिष्ठितिमिति · इच्छोपधायकज्ञानस्य कृत्युपधायकेच्छायाश्चोपरिष्ठितिं विनेत्यर्थः नचेति · इच्छा
चे कालेज्ञानस्य कृतिकाले च्छायाना साक्षात्कार इत्यर्थः ज्ञानसंस्कारयोरेकदोत्पादाद्योग्यत्युक्तं · योगपत्वं चवेगावृत्ति
प्रत्यक्षजातिमत्वं · तेन निर्विकल्पकद्वयस्यापि नैकदोत्पत्तिः इत्थं च ज्ञानसंयोगयोरुक्तयौगपद्यतावतोर्यौगपद्ये नव्य
भिचारः स्यादत उक्तं विशेषेति · रूपरसयोर्यौगपद्यविशेषगुणयोर्घटादौ युगपदुत्पादादुक्तमात्मनीति · विभिन्नावच्छे
देन सुखदुःखयोर्यौगपद्यस्वीकारे एकावच्छेदेनेति पूरणीयं · केचित्तु · विशेषगुणपदं सविषयकविशेषगुणपरं वा
च्यं · सर्वं चात्मपदं शरीरार्थकं · तेन कायव्यूहदशायां सौभरिप्रभृतेर्नानाशरीरावच्छेदेन ज्ञानादियौगपद्येपि न क्षति
रित्याहुः इच्छादिजनकेति · इच्छाद्युपधायकेत्यर्थः ननु ज्ञानादाविच्छादेः स्वरूपयोग्यत्वस्य फलोपधायकत्वस्य वा

42

ग्रहार्थज्ञानत्वादिसामान्यप्रत्यासत्तिरभ्युपेयते ः तत्र नाद्य इत्याह पौर्वापर्येत्यादिना ॰ ग्रहासंभवादित्यप्र[illegible]विशेषणाभ्युपेयत्वा
दित्यत्र हेतुः इच्छाकृतीति ॰ इच्छानुत्पादस्थले ज्ञानस्य कृत्यनुत्पादस्थले चेच्छायाः साक्षात्कारादित्यर्थः मनसेति ॰
कारणत्वनिविष्टस्य सत्त्वस्य स्वरूपस्थितत्वादित्यादिः तथा च फलानुपधायके एव ज्ञानादाविच्छादिस्वरूपयोग्यत्वस्यान्व
यव्यतिरेकाभ्यां मनसा ग्रहसंभवादिच्छाद्यनुपधायकज्ञानादिव्यक्तीनामनुपस्थितावपि न क्षतिरिति भावः द्वितीय
मभिप्रेत्याह कृत्यनुत्पादस्थल इति ॰ ज्ञानेच्छयोः समूहालंबनसाक्षात्कारस्यासंभवात् इति योजना । न चेच्छोत्तरं ज्ञा
नस्य न साक्षात्कारः कार्यसहभावेन विषयस्य हेतुत्वादिति वाच्यं ॰ अनुमित्याद्युत्तरमपि परामर्शादेरनुव्यवसायात्
सर्वत्र विषयस्य तत्ता हेतुत्वाभावात् ॰ न चेच्छासाक्षात्कारस्य ज्ञानत्वांशे निर्विकल्पकतया जनकतावच्छेदकरूपेण
फलोपधायकव्यक्तिग्रहासंभवात्तद्दोषस्तदवस्थ इति वाच्यं ॰ अभावत्वादेरिव ज्ञानत्वादेः सविकल्पकैकवेद्यत्वान्नि राम०
मो विकल्पोत्तरं स्वोपनायकैर्ज्ञानत्वविशिष्टज्ञानबोधस्यासंभवाच्चेति भावः ॥ नन्वेवमपि ज्ञानस्य कृत्यनुपधायकत्वग्र
स्य१

हः सामान्यप्रत्यासत्तिं विना दुर्घटः कृतिपर्यंतफलोपधायकज्ञानव्यक्त्यसत्वे तदुत्तरं तद्ग्रहासंभवाद् तत्राह स्मरणेनेचे त
ति· तथा चेदं स्मरणं ज्ञानजन्यसंस्कृतित्वादिति क्रमेण पक्षधर्मतावलेन कृतिफलस्योपधायकज्ञानव्यक्तिमनुमाय
पश्चात्तत्र कृतिकारणत्वग्रहः करणीय इति भावः। ननु यत्रोपेक्षात्मकेन ज्ञानेन कृतिर्जनिता तत्र तेन स्मरणानुत्पा
दान्न स्मृत्या तदनुमानमसंभवीत्य तत्राह विंशतीति· व्यासंगानुरोधाज्ज्ञानयोरात्ममनोयोगपर्यंते ध्वंसे ननु विशे
ए षगुण[■]मात्रस्येत्याशयः साह विंशतीति· नचैके स्वश्रयत्न: तत्र विंशत्संयुह वैच्छेदेनोत्पद्यत इति वाच्यं· स्वगुणलिंगविष्टा
त नांतारतम्यस्यानुभवेन यत्न वैलक्षण्यस्यावश्यकत्वादिति भावः। नन्विदं गोपदशक्यतावच्छेदकं गोत्वादिस्वत्रतादा
न त्म्येनार्थं सास्नावां गोत्वादित्यत्र च समवायेन गोत्वहेतौ गवेतरावृत्तित्वविशिष्टस्य सकलगोवृत्तित्वरूपस्य गोत्वत्वस्य व्याप्यता
च्छेदकत्वपाततदंतर्गतस्य सकलगोग्रहार्थं सामान्यप्रत्यासत्तेरावश्यकीति प्रगल्भमतं निरस्यति गोत्वेचेति· गोपदशक्यताव
च्छेदकत्वस्य साध्यतायां समवेतत्वविशिष्टगवेतरासमवेतत्वमात्रं गोरूपादौ व्यभिचारीत्यतो गोनिष्ठत्वादि· गोनिष्ठाभाव

स्यगोवृत्त्यन्योन्याभावस्यप्रतियोगित्वंयेनतदन्यत्वमितिव्युत्पत्त्यागोनिष्ठान्योन्याभावप्रतियोगितावच्छेदकान्यत्वेस
तीत्यर्थः तेनगोत्वस्यापिगोनिष्ठविशिष्टाभावादिप्रतियोगित्वेपिनहेत्वप्रसिद्धिः अवच्छेदकत्वंतुकिंचित्धर्मानवच्छि
न्नंसमवायसंबंधावच्छिन्नंचग्राह्यमतोनोक्तदोषतादवस्थ्यं। गगनादौव्यभिचारवारणार्थमाहसमवेतत्वेनचेति।
सास्नादेः साध्यतायांगवेतरासमवेतमात्रस्यैवसमवायिनहेतुत्वसंभवादाह अविशेषितंवेति नत्विति। नतुतत्तदनं
तगोव्यक्तिवृत्तित्वविशेषितमित्यर्थः अशक्यत्वादिति। तत्तद्व्यक्तित्वेनानंतगोव्यक्तीनामेकदानुपस्थितेरितिभावः।
नैयायिकः शंकतेस्यादेतदिति। एतदूषणंस्यादित्यर्थः। समानेति। रजतत्वावच्छिन्नधर्मिताकेष्टसाधनताज्ञानत्वेन
समवायप्रत्यासत्त्यारजतत्वप्रकारकेच्छांप्रतिप्रयोजकत्वइत्यर्थः रजतत्वप्रकारकेच्छासामान्यंप्रतितत्प्रकारकज्ञा
नत्वेनहेतुतायांप्रमाणाभावेनयथाश्रुतासंगतेः। रजतज्ञानजनत्वादिप्रकारकप्रवृत्तिंप्रत्येवरजतत्वादिप्रकारकत्वेनो राम०
पादानप्रत्यक्षस्यहेतुत्वादितिध्येयं। रजतत्वादिपदं सुखत्वादेरुपलक्षकं सुखादेः स्वतः प्रयोजनतयासमानप्रकार

कार्यत्व कार्यत्वेनैव तत्र ज्ञाने द्वयोः कारणत्वं संभवादिति चेत् किंचित् न वस्तुतो पद्धर्मिकेष्टसाधनताज्ञानं तत्रैव यदभावे द्वेषः तत्रापि
इष्टाज्ञापत्तेरिति सर्वत्र फलान्तरगोचरेच्छायां नेष्टसाधनताज्ञानापेक्षेति स्वयमेव बौद्धाधिकारे व्यवस्थापितं तन्न यावद्यत्र वि
नश्यदवस्थेनैव रजतत्वाभावधर्मिकद्वेषसाधनताज्ञानेन रजतत्वाभावे द्वेषो जनितस्तत्रोत्तरकालमज्ञातेपि रजते रज
तत्वप्रकारेणेच्छापत्तिरतः सामान्यतो रजतत्वप्रकारकेच्छायां रजतत्वप्रकारकज्ञानत्वेनैव हेतुत्वं तत्र भावरूपकं स्व नापि
तः समानप्रकारतामात्रेण [illegible] न्यादिकं यथा ज्ञानमेव सम्पादयतीति प्रतीमः। क्वचिदेवेति रजतत्ववत्तया निश्चिते धर्मिणीत्य
[illegible] हीन रजतत्वासंसर्गिके [illegible] दिति तथा च रजतत्वप्रकारकज्ञानाद्दूरादेरपि तत्प्रकारके
च्छापत्तिरिति भावः। ननु तत्[illegible]सुखीय रजतत्वप्रकारकेच्छासामान्यं प्रत्येव तत्सुखीय रजतत्वावच्छिन्नधर्मिकेष्टसाधन
च ताज्ञानत्वेन हेतुत्वं तत्रैकार्यस्य विशेषत्वं कारणस्य तत्तत्प्रकारीभूतरजतत्वाश्रयत्वप्रत्यासत्तिरतो घटादौ न रजत
त्वप्रकारकेच्छेत्यत आह नानेति प्रकारेति कथमिति तथा च शुक्त्यादिधर्मिकरजतत्वप्रकारकेच्छायां व्यभिचारादुक्तम्

न भेदाद्धेतुत्वं संभवतीति भावः ननु तद्धर्मिकरजतत्वप्रकारकेच्छायां तद्धर्मिकरजतत्वासंसर्गाग्रहस्याभावोपि हेतुर्वाच्यः
५५ इति इच्छायां न विशेष्यानियमः न च शुक्तौ रजतधर्मिकरजतत्वासंसर्गाग्रहस्याप्रसिद्ध्या रजतत्वप्रकारेण तत्रेच्छानस्या
त्कारणाभावादिति वाच्यं रजतान्यधर्मिकेच्छाणामेवोक्तभेदाद्धेतुत्वोपगमात् रजतत्वासंसर्गग्रहस्य साकांक्षत्वतत्त
द्धर्मितानाभावस्यैव वा हेतुत्वादतस्त्राहस्येतुपरिष्कृतमिति तथा च यत्र घटादौ रजतत्वस्यासंसर्गग्रहस्तत्र रजतत्वप्रका
रकेच्छानुत्पादेपि शुक्त्युपहितनया वद्धस्तुशुक्तादृश्यैच्छादर्शनात्तेषु रजतत्वासंसर्गज्ञानविरहस्य स्वतः सिद्धत्वादिति भा
वः एकधर्मिकरजतत्वप्रकारकज्ञानदशायां यत्र यत्र रजतत्वासंसर्गज्ञानस्य विरहः ते तु भाविविषिवासाते शपिज्ञापतए
वरजतत्वप्रकारकेच्छे तियदि ब्रूयात्तदाह यत्किंचिदिति नियामकत्वमिति कारणतावच्छेदकीभूयेत्यादिः इच्छायां धर्मिनि
यमार्थं तत्तद्धर्मिविशेष्यकरजतत्वप्रकारकेच्छायां तत्तद्धर्मिकरजतत्वासंसर्गज्ञानाभावत्वेन कारणत्वमयेष्टप तत्तद्धर्मि राम०
केच्छायां तत्तद्धर्मिकेष्टसाधनताज्ञानत्वेनैव लाघवाद्धेतुत्वं युक्तमित्यर्थः तथा च भाविरजतधर्मिकेच्छाजननार्थं मवश्य

क पक्षरणीयस्य माविरजतधर्मिज्ञानस्य प्रकारांतरेणासंभवादवश्यं सामान्यलक्षणा वाच्येति निष्कर्षः । नन्वेवं द्रव्यत्वेन रज
र तधर्मिकेष्टसाधनताज्ञानादपि रजतत्वप्रकारेणातत्रेच्छा स्यादतस्त्वाह सामान्यतस्त्वेति । संवादिविसंवादीच्छासाधारणेपन्ने
त्यर्थः तदिच्छायां तद्विषयकेच्छायां । तत्प्रकारकत्वमिति । तथाच रजतत्वप्रकारेण तत्तद्धर्मिकेष्टसाधनताज्ञानत्वेन रज
त तत्वप्रकारकतत्तद्धर्मिकेच्छां प्रति हेतुत्वान्नातिप्रसंग इति भावः नन्वेवं संवादीच्छास्थले रजतत्वेन एव तत्तद्रजततद्धर्मितभो
वेरणानंतकार्यकारणभावापत्तिरतः सामान्यतो रजतधर्मिकरजतत्वप्रकारकेच्छां प्रति हेतुत्वान्नातिप्रसंग इति) यं रज
तत्वप्रकारेण रजतधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वमस्तु तथाचातीतरजतगोचरतानादेवमावरजतत्वप्रकारेच्छा
संभवात् । कृतं सामान्यलक्षणया विसंवादीच्छास्थले तु न तद्धर्मितद्धर्मिवेरणानंतकार्यकारणभावो नन्वनागतेष्वेव सर्वेर
सा भ्युपेतव्य इत्यस्वरसादाह स्वस्तुवेति । तथाच धर्मिमात्रस्य प्रवेशेनातिलाघवात् तत्सुरभीयरजतत्वप्रकारकेच्छायां
तदीयरजतत्वावच्छिन्नविशेष्यताकेष्टसाधनताज्ञानत्वेनैव हेतुत्वमस्तु समानविशेष्यतया प्रत्यासत्तित्वादेवैकध

45

क र्मिज्ञानादन्यधर्मिकेच्छानुत्पत्तेः संभवादित्यकामेनापिसामान्यलक्षणागोचरकार्यतांविनाभाविज्ञानासंभवेतत्रेच्छानुत्प न
त्तिप्रसंगादित्याशयः नचात्राप्यनंतपुरुषांतर्भावादनंतकार्यकारणभावतादवस्थ्यमितिवाच्यं रजतत्वप्रकारेणतत्त
त्पुरुषधर्मिकविसंवादीच्छानुरोधेनविषयविषयिपुरुषव्यक्तीनांनिवेशस्यपूर्वकल्पे [illegible] वश्यकत्वादितिभावः सामा
नाधिकरण्यमिवेति परमतेदृष्टांतः तथाचसमानप्रकारतामात्रेणाहेतुतावादिभिः [illegible] पुंसोज्ञानादन्येच्छान्या स्ये
दवारणायसामानाधिकरण्यप्रत्यासत्तिरुच्यते तथैवास्माभिरप्येकधर्मिकज्ञानादन्यधर्मिकेच्छा [illegible] समा
नविशेष्यत्वंप्रत्यासत्तिः स्वीकृतेतिभावः प्रांचस्तु रजतत्वप्रकारकेच्छासामान्यंप्रतिरजतत्वावच्छिन्नधर्मिकेष्टसाधन
ताज्ञानत्वेनहेतुत्वेतत्रचैकस्यपुंसः रजतत्वप्रकारेण ज्ञानादन्यस्यतादृशेच्छापत्त्यासामानाधिकरण्यंप्रत्यास
त्तिः तथैकधर्मिकज्ञानादन्यधर्मिकेच्छोत्पत्तिप्रसंगेनसमानविशेष्यत्वमपीतियथा [illegible] यंथार्थमाहुः तन्न राम०
रु समानविशेष्यत्वप्रत्यासत्त्याहेतुतायांतत्पुरुषीयत्वस्यावश्यंनिवेशनीयत्वादन्य [illegible] रजतधर्मिकेष्टसाधन

ताज्ज्ञानवतोपि पुंसः शुक्तिधर्मिकरजतत्वप्रकारकेच्छोत्पत्तिप्रसंगात् पुरुषांतरीयरजतत्वप्रकारकज्ञानस्य विशेष्यतासं
बंधेन शुक्तौ सत्त्वादिति दिक्। स्वत्वस्यानुगतत्वे रजतत्वप्रकारकेच्छासामान्यं प्रति स्वसमानविशेष्यकरजतत्वप्रकारक
ज्ञानत्वेन हेतुत्वं प्राच्यैरुक्तमपि सम्यक् विशेष्यनियमार्थं स्वसंसर्गादेः कारणतावच्छेदककल्पनामपेक्ष्य लाघवादित्याह स्व ग्रह
संसर्गाग्रहादेरिति। आदिना भेदाग्रहव्यावर्त्तकधर्मोग्रहादेः परिग्रहः समानविषयत्वस्य स्वसमानविशेष्यकत्वस्य नि
वेशोपीत्यपि नानुगताननतिप्रसक्तं स्वत्वमेव हेतुर्वेचाभिस्यस्वाशः सूचितः ननु यथार्थरजतत्वप्रकारकेच्छात्वावच्छिन्नं प्र
त तिदोषाद्यभावविशिष्टस्य रजतोपा संसर्गाग्रहस्य हेतुत्वात् रजतत्वप्रकारकेच्छासामान्यं प्रत्यपि रजतत्वांशे संसर्गाग्रहोऽवश्यं हे
तुर्यो द्विशेषयोरिति न्यायात् तत्कुतः कारणताविभावः एतेन समानविशेष्यत्वप्रत्यासत्त्यैवातिप्रसंगभंगेन निरस्तमित्यये
स्वयं तत्प्रकारकज्ञानमिति। तत्प्रकारेणेष्टसाधनताज्ञानमित्यर्थः हेतुरिति परेणान्वयः तस्यां इच्छायां दंडे रजतमिति भ्र
मासु तया दोषयथार्थेच्छाप्रसंगात् दाह दोषाभावसहितामिति तत्प्रकारकज्ञान तामपेक्ष्य तु कामतस्त्वाह कारणेति कार्य

स्पद्धायादेः तथा च यथार्थघटादिकं प्रत्यपि यथार्थेज्ञानादेरेव समानविशेष्यत्वप्रत्यासत्त्या हेतुत्वाद्विशेषतोप्यसंसर्गाग्र
46 हस्य हेतुत्वमसिद्धमिति भावः। एतेन समानविशेष्यत्वप्रत्यासत्त्यैवातिप्रसंगभंगेन निरस्तमित्यग्रेऽन्वयः। तत्प्रकार
कज्ञानमितिः तत्प्रकारेरोपसाधनताज्ञानमित्यर्थः हेतुरिति परेणान्वयः तस्यां इच्छायां इदं रजतमिति भ्रमाशुक्त्यादौ प
यार्थेच्छाप्रसंगादाह दोषाभावसहितमिति। तत्प्रकारकज्ञानमिति शेषः। शुक्त्यादौ रजतभेदग्रहे तद्धर्मिकविसंवादीच्छानु
त्पत्तेराह विसंवादिन्यां त्विति। तस्यामित्यनुषज्यते। उपस्थितं यद् रजतं तद्धर्मिकरजतभेदाग्रहसहितमित्यर्थः नचैवं रंगे र
जतभेदग्रहदशायां शुक्तौ विसंवादीच्छा न स्यात् इति वाच्यं। विसंवादिरजतत्वप्रकारकेच्छात्वेन जन्यता रजतभेदप्रका
रत्वानिरूपिता रजतधर्मिताकज्ञानत्वेन हेतुत्वं समानविशेष्यत्वं प्रत्यासत्तिरित्यत्र तात्पर्यात्। अन्यथाख्यातिमतं गी था
मस्मा कुर्वतोक्तं कूटलिंगजनित इदं रजतमित्याकारज्ञानद्वयाद् पि यथार्थे रजते इच्छोत्पादात् तत्र यथार्थरजतत्वप्रकारकज्ञान राम०
त्वेन हेतुत्वं दुर्घटमतस्तत्राह त्वहिशापीति। उपस्थितं यद् रजतं तद्धर्मिकरजतभेदग्रहाभावस्येत्यर्थः नचैवमेकत्र रजत

क२

भेदग्रहेपि रजतं तत्र संवादिनीच्छा न स्यात् रजतधर्मिकभेदग्रहसत्त्वादिति वाच्यं॰ संवादिरजतत्वप्रकारकेच्छात्वेन का
र्यत्वं रजतभेदप्रकारत्वानिरूपितरजतधर्मिताकज्ञानत्वेन रजतभेदानिराकांक्षरजतधर्मिताकज्ञानत्वेन रजतत्वसाकां
क्षरजतधर्मिताकज्ञानत्वेन वा हेतुत्वं समानविशेष्यताप्रत्यासत्तिरित्यत्र तात्पर्यात्॰ साकांक्षा च परेषां पदार्थान्तरं
कचित् ज्ञानद्वयस्थलेपि तेन रजतम् एव नेदं रजतमिति भ्रमात्मकज्ञानद्वयादपि न संवादिनीच्छा न वा कूटलिंगका
परामर्शोत्तरोत्पन्नस्य प्रमात्मकज्ञानाभिषिक्तस्येदं रजतमिति ज्ञानद्वयस्योत्तरं संवादिनीच्छा उत्पत्तिरिति ध्येयं॰ हेतुत्वेच्छित
प्रयोजकत्वमित्यर्थः तेन भेदाग्रहस्य कारणतावच्छेदकत्वेपि न क्षतिः श्रोचित्यादिति॰ स्वतन्त्रपापख्यातिवादिनां पुनर
स्माकं लाघवाद्विशिष्टज्ञानमेव हेतुरित्याशयः। श्रोचित्ये हेतुमाह दोषाणामित्यादि स्वभावमयेक्ष्येति॰ न च भेदग्रहसे
व भेदव्याप्यवत्ताग्रहाणां भेदावच्छेदकधर्मवत्ताग्रहाणां चाभावस्य हेतुतापाः कल्पनीयत्वात् गौरवं समानमिति
वाच्यं॰ संवादिरजतेच्छां प्रति रजतत्वसाकांक्षरजतधर्मिताकज्ञानत्वेन हेतुत्वमभ्युक्त चरमकल्पे भेदव्याप्यवत्ताद्यग्रह

स्यहेतुत्वाभावेपिक्षत्यभावादितिभावः सिद्ध इति उत्पन्न इत्यर्थः सुखादाविच्छानस्यादितिभावेरागादाह सुखइति नन्व मूलस्थ

घताम त्पन्नसुखेसिद्धत्वनिर्णयेनप्रतिबंधात्कथमिच्छोत्पत्तिरत आह लाघवादिति तद्धर्मिकेच्छायां तद्धर्मिकसिद्धत्वनिश्च

यत्वेनप्रतिबंधकत्वेधर्मिभेदेनगौरवादित्यर्थः तत्प्रकारकेच्छायामिति तद्धर्मविशिष्टोद्देश्यताकेच्छायामित्यर्थः तेनसु

दि खत्वावच्छेदेनासिद्धत्वग्रहेपिसुखहेतुः पटो जायतामित्यादेः सुखत्वप्रकारकेच्छाया उत्पादः तत्रेच्छायां तादृशपटत्वविशिष्ट

मिस्य स्योद्देश्यतयाविषयत्वात् उद्देश्यत्वंपुनरिच्छायास्वानुभवसाक्षिकोविषयताविशेषः मुख्यविशेष्यतानिरूपिततत्प्र

ता कारकेच्छायामित्यर्थकरणान्नोक्तदोष इति तु न युक्तं। सुखत्वावच्छेदेनसिद्धत्वग्रहेप्यहंसुखीस्यामित्याकारकेच्छाप्रसंग

त आत्मत्वावच्छेदेनसिद्धत्वनिश्चयदशायामहंसुखीस्यामितीच्छानुत्पादप्रसंगोच्छेतिध्येयं तत्प्रकारकसिद्धत्वनिश्च

यमात्रस्यविरोधित्वेसिद्धः सुखत्ववांस्तुगुणाइत्यादिसमूहालंबनेपिसुखंजायतामितीच्छानस्यादत उक्तं तदवच्छेदेनेति राम०

तद्धर्मावच्छिन्नविशेष्यताकेत्यर्थः अवच्छेदकत्वंतुविशेष्यकोटिप्रविष्टतामात्रेणग्राह्यं तेनसुखंसिद्धमित्याकारकस्य

न वभोज्ञं ज्ञानमनस्सुखं सिद्धमित्याकारकस्यापि निश्चयस्य सत्वे सुखं जायतामितीच्छाया नोत्पादः अतस्वभीत्याधनत्वाभेद
नमात्रार्थितेनेच्छा किंतु प्रतियद्धाघधी नधनार्थिन एव यत्किंचिद्विशेषसिद्धैव सामान्येच्छाविच्छेदादिति शदमरामाव द्वि
प्युक्तं नचैवं सुखसामान्यं सिद्धमित्येवं सुखत्वावच्छेदकतामंतर्भाव्य निश्चयेपि भोज्ञनस्सुखं जायतामितीच्छात्र संगःता
दृशसुखत्वावच्छिन्ने सिद्धत्वनिश्चयादिति वाच्यं तस्यापि स्वातंत्र्येण तादृशेच्छाविरोधित्वादिति भावः ज्ञानमिति निश्चय
इत्यर्थः नचेत्यादि तत्सुखत्वावच्छेदेन सिद्धत्वज्ञानं प्रकृतेसुखत्वप्रकारकेच्छा स्वहत्वेनेत्यर्थः उत्पन्नसुखेषु तत्तद्व्यक्तित्वे
नैव सिद्धत्वनिश्चयात्स्कुरवत्वमंतर्भाव्य तत्सुखं सिद्धमित्याकारनिश्चयसत्वे तु सुखांतरत्वप्रकारसैव तत्रेच्छेति भा
वः ननु इच्छासामान्यं प्रत्येव समानविशेष्यत्वप्रत्यासत्त्या सिद्धत्वनिश्चयस्य प्रतिबंधकत्वं तत्तदनंतधर्मितावच्छेदकां
तर्भावेणानंत्यात्त्वे गौरवात् तत्कृतः सिद्धसुखादावच्छेत्यत आह कथमिति अन्यथा तत्तद्धर्मानंतर्भावेणाविरोधित्वे नैया
य यिकः शंकते अथेति घ पितत्वदैश्याभावात्मप्यतानाभावविशिष्टसिद्धत्वनिश्चयाभावत्वेन सकलेच्छाहेतुत्वमपेक्ष्यासि

अ

द्धत्वज्ञानस्यतद्धर्मिकतत्तदसाधारणनिश्चयाभावकूटस्यचप्रत्येकरूपेणाहेतुतायामेवगौरवंतथापिसिद्धत्वस्यैवतद्व्याप्यव
त्वस्यतदवच्छेदकधर्मवत्वस्यवज्ञानेप्रतिबंधकत्वकल्पनादेवलाघवं।सिद्धत्वज्ञानीयतत्तदसाधारण्यसंशयव्यक्तीनांप्रा
तिस्विकरूपेणाभावकूटस्यप्रतिबंधकतावच्छेदकीभूतस्यविशेष्यविशेषणाभावेनानंतकार्यकारणभावकल्पनाप्र
येऽप्यवलाघवंग्राह्यं।सिद्धत्वस्यज्ञानांतरमप्रमेयत्वादिरूपेणासाधारण्यज्ञानसत्वेऽपिसिद्धत्वनिश्चयेनेष्टाप्रतिबंधादसाधारण्य
ज्ञानसामान्याभावस्यैवतेजनकत्वासंभवात्।नचतत्तदसाधारण्यज्ञानाभावकूटविशिष्टसिद्धत्वनिश्चयाभावव्यक्तेरखंडत
देव्यक्तित्वेनैवहेतुत्वादुक्तगौरवानवकाशः प्रतियोग्यविशेषिताभावस्यहेतुत्वेतादृशसिद्धत्वनिश्चयाभावसहचरितस्या
स्या नतिप्रसक्तोऽभावांतरस्यापितद्व्यक्तित्वेनहेतुतापत्तेःविशिष्टाभावस्यविशेष्याविशेषणाभावानतिरिक्तत्वेऽखंडा
भावव्यक्तित्वासंभवाच्चेत्यंशयः।असिद्धत्वज्ञानार्थमित्यस्यकोर्थःकिंसुखादाविसिद्धत्वप्रकारकज्ञानार्थंअसिद्धत्वविष राम०
यकज्ञानार्थंवानाद्यः इत्याह विशेषेत्यादि उत्पन्नेसुखेऽपिविषवततद्व्यक्तित्वेनाखंडाभावव्यक्तित्वा)नसिद्धत्वनिश्चयेऽपिसुख

त्विनासिद्धत्वज्ञाननिबाधकाभावादितिभावः। ननुविशेषतःसिद्धत्वज्ञानदशायांयत्सामान्यतोऽसिद्धत्वज्ञानंतन्नविशिष्ट
धीःअन्यथाख्यात्यनंगीकारादित्यतआहतदिति·एकस्मिन्नितिस्वमतेद्वयंचेतिपरेषांअसिद्धत्वसाकांक्षधर्मिज्ञानस्यैवइच्छा
जनकतयाज्ञानद्वयेपितत्संभवादितिभावः।द्वितीयेत्वाहसामान्येति·सुखत्वादिसामान्यलक्षणायास्तत्रासामर्थ्यादिति
क भावःनन्वेवमिच्छायाअनागतविषयत्वप्रवादोव्याहन्येतेत्यतआहवस्तुतस्त्विति·वर्तमानकालस्यसुखप्रागभाववत्वा
द्यनुमितौवर्तमानकालवृत्तिप्रागभावप्रतियोगित्वादिलक्षणमसिद्धत्वंसुखस्यापिसुग्रहमित्याशयेनाहअपिकालइत्या
दिप्रागभावानभ्युपगमेवर्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वमेवासिद्धत्वंवाच्यमतस्तद्ग्रहार्थंसाध्यांतरमाहसुखो
त्पादेत्यादि·महाप्रलयमनंगीकृत्याहकालत्वादिति·तदंगीकारेत्वाहएतादृशेति·खण्डकालत्वादित्यर्थःअनुमानादिति·
प्रयोजकत्वेपंचमी।तेनोक्तानुमितेःसाक्षादसिद्धत्वानवगाहित्वेपिनक्षतिःतत्सहकारेणमनसैवोत्तरकालसुखस्यासिद्ध
त्वस्यग्रहसंभवादितिध्येयं मिश्रास्तुवर्तमानकालवृत्तिप्रागभावप्रतियोगित्वंनासिद्धत्वंकिंतुसन्ध्यामादौतद्भाववति
सुखोत्पादककालीनध्वंसप्रतियोगि३

४ सिद्धत्वज्ञानस्य विरोधित्वपक्षे च तत्तत्कालावच्छेदेन स्ववृत्तित्वमेव सिद्धत्वं ग्राह्य ४

३ असिद्धत्वज्ञानस्य जन्यतावच्छेदकतयैव सर्वत्रेच्छायां मदंशोपरागात् ३

ध्वंसेपीच्छानुभवात् किंतु वर्त्तमानकालावच्छेदेन स्ववृत्तित्वमेव तथा सुखादिधर्मिकस्ववृत्तित्वप्रकारकतत्कालीनेच्छां
त प्रति सुखादिधर्मिकतत्कालावच्छिन्नस्वावृत्तित्वप्रकारकज्ञानत्वेन हेतुत्वात् अत एव सुखं मे जायतामित्याकारेपीच्छायाः
सर्वजनसिद्धः संपद्यते स्ववृत्तित्वं तु सुखादौ स्वसमवेतत्वं पाकादौ स्वकृतिविषयत्वं ग्रामादौ स्वीयस्वत्वादिकं यथानुभवमू य
हनीयमिति प्राहुः। ननु भाविसुखप्रागभावादिव्यक्तेः पूर्वमज्ञानात्कथं तत्साध्यकानुमितिरत आह निपुणेत्यादि साध्य
तावच्छेदकरूपेणैकव्यक्तिज्ञानादेव पक्षधर्मताबलात् रूपेण साध्यान्तरानुमितेः याकानुमाने संपादयिष्यमाणत्वादिति
भावः। अत्र ज्ञातिमत्वप्रकारेणावह्नेरुपनयदशायां वह्नित्वेन तस्योपनीतप्रत्यक्षानुदयाद्वह्नित्वेन तत्तद्व्यक्त्युपनीत
भानं प्रति वह्नित्वेन तत्तद्व्यक्तेर्ज्ञानमवश्यं हेतुर्वाच्यं तथा च तत्रैवावह्निस्थले तत्तद्व्यक्तीनां विशिष्योपादानेपि वह्निस्थ
ले वह्नित्वेन यस्य कस्यापि ज्ञानमेव वह्नित्वेन वह्न्युपनीतप्रत्यक्षं प्रति हेतुः कल्प्यते न तु तत्तद्व्यक्तित्वं संतर्भावेण लाघवा राम०
दिति वह्नित्वेन कस्यापि ज्ञानसत्त्वे वह्नित्वेन सकलवह्निप्रत्यक्षं दुर्वारमिति भावः एवं संपन्नमेव सामान्यलक्षणाया अस्या रा

सत्तित्वं· नचैवंवन्हित्वेनतत्वद्धुं॥ ज्ञोपनीतभानंमत्यपिवन्हित्वप्रकारकतत्वहुंज्ञाज्ञानत्वेनहेतुत्वंनस्यात् सामान्यतोवन्हि
त्वप्रकारकयुंज्ञोपनीतप्रत्यक्षंप्रत्येववन्हित्वप्रकारकयुंज्ञाज्ञानत्वेनहेतुत्वकल्पनेलाघवादितिवाच्यंवन्हित्वेनैकयुंज्ञो
ज्ञानोत्तरंतादृप्येणगुंज्ञांतरोपनीतभानस्यानुभवबाधितत्वादेवतत्वहुंज्ञातमोवेणाहेतुत्वकल्पनात्प्रकृतेचवन्हित्वेनै
कवन्हेरुपनयोत्तरंतादृप्येणवन्ह्यंतरोपनीतप्रत्यक्षेबाधकाभावादन्यथाबाधकबलादेवसामान्यलक्षणाखंडनसं
भवेसाधकाभावोपन्यासानौचित्यादित्यस्महुरुचरणाः॥ ननुप्रमेयत्वप्रकारेणघटत्वज्ञानादुत्पन्नस्यप्रमेयवानितिनि
त्यप्रका कः श्चयस्यैवविरोधित्वघटैकस्यसत्वात्कथंघटोनवेत्याकारस्तादात्म्येनघटस्यसंदेहइत्यतआह संशयेति· तद्विरोधीघटो
नवेतिसंशयविरोधी· निष्प्रकारं निरवच्छिन्नप्रकारताकः। तेनघटत्वांशेसप्रकारकस्यापिसघटःप्रमेयवानितिनिश्च
यस्य सुघटोनवेत्याकारसंशयविरोधित्वमक्षतं। नन्वेवमयंघटत्ववानितिनिर्णयोघटोनवेतिसंशयविरोधीनस्यात्
घटत्वेन प्रकारत्वादतआह घटत्ववानिति· तथाचतद्वद्विशिष्टमेवतज्ज्ञानंतदभावव्याप्यवत्ताज्ञानविषयैवतद्वत्व
ग्रोघटत्वस्ये

ज्ञानप्रतिबंधकमितिभावः। ननु प्रमेयत्वादिसामान्यलक्षणयैव स्वाश्रयस्य घटादेर्निर्विकल्पकं कुतो न जन्यत इत्य ५०
त आह सामान्येति॰ अन्यथा धर्मीतरज्ञानादपि स्वाश्रयस्य प्रत्यक्षोदये॰ व्यभिचारप्रसंगादिति भावः। ननु धूमकृतस्थ
ले सामान्यप्रत्यासत्तेर्विशिष्टप्रत्यक्षजनकत्वमेव नास्तीत्यत आह विशिष्टसामग्रीति॰ ॥ इति सामान्यलक्षणाटिप्प
टी समाप्त श्री सवंत् १८३१ मिति श्रावन वदी ८ वार सनीचर

धी३ (above line 1)

त्वा
सामान्य

राम॰
५०